


ॐ श्री भृगु. बार २० कार्तिक. शु. १० सत्त युग संमत. २२. वि. २०२२

श्रीमद्भगवत गीता

अमीन



जय कृष्ण, हरि कृष्ण, नरेन्द्र कुमार, सुरेन्द्र कुमार
सुपुत्र
स्व॰ पं॰ पुरुषोत्तम दास सुपुत्र पं॰ सहदेव
V. P.O अमीन (कुरुक्षेत्र)









ॐ नमो भगवते वासुदे

वाय ॥ ॐ अस्य श्रीभगव

द्गीतामालामंत्रस्य ॥ श्रीभ

गवान्वेदव्यासऋषिः

अनुष्टुप्छन्दः॥ श्रीकृष्णः।

परमात्मा देवता॥ अशो

गवान्वेदव्यासऋषिः

अनुष्टुप्छंदः ॥ श्रीकृष्णः

परमात्मा देवता ॥ प्रे

९

च· ६

ख्यानवशेणवसंप्रताबादेष्वा
भाषसेतिबीजं ॥ सर्वधर्मान्परि
त्यज्यमामेकंशरणंव्रजेतिशृंखे
यद्दंत्वांसर्वपापेभ्योमोक्षयिष्या

चार्वगालासाय मुत्कीलय ऊं नं कीलय स्वाहा
२०७६ वा व आ बुध: कर सांध दां सो द्धि: नाम ली









































नहिधर्मोधराकिंदुजीह्वःफणी:
द्व:नाहंघोराहीमदीकीमसीरव
गपतिनोहरीकीकपींद्रइष्यंराधा
वीवादेप्रतिहनुवचनपातुनःपद्म
नाभः॥१॥मंगलंभगवानवीष्णु ॥ः०ः॥

गवान्वेदव्यास ऋषिः

अनुष्टुप्छन्दः॥ श्रीकृष्णः।

परमात्मा देवता॥ अशो

व्यानलशोचलंयक्षावादंश्च

भा६सेतिवीजे॥सर्वधर्मान्परि॰

त्यज्यमामेकंशरणंब्रजेतिशाम्निः

अहंत्वासर्वपापेभ्योमोक्षयिष्या॰

मिमाशुचः इतिकीलकं॥ नैनं
छिंदंतिशस्त्राणिनैनंदहतिपा
वकइत्यंगुष्ठाभ्यांनमः॥ नचै
नंक्लेदयंत्यापोनशोषयतिमारु

नइतितर्जनीभ्यांनमः ॥ अच्छे

द्योयमदाह्योयमक्लेद्योशोष्य

एवचेतिमध्यमाभ्यांनमः ॥

नित्यः सर्वगतः स्थाणुरचलो

येमनानन्दस्यानामिकाभ्यां

नमः॥ पृष्पमेपार्थंहृपाणि

शातश्रोपयमहद्खशाइतिका

निष्ठिकाभ्यां नमः॥ नानावि

धानिदिव्यानिनानावर्णाकृ
तीनिचेतिकरतलकरपृष्ठा
भ्यांनमः॥इतिकरन्यासः॥नै
नंछिंदंतिशस्त्राणीतिहृदया

यनमः ॥ नचैनंक्लेदयंत्यापइ
ति शिरसे स्वाहा ॥ अच्छेद्योऽय
मदाह्योयमिति शिखायैव
षट् ॥ नित्यः सर्वगतः स्था

णुरिति कवचाय हुं ॥ पश्य मे
पार्थ रूपाणीति नेत्रत्रयाय वौ
षट् ॥ नानाविधानि दिव्यानी
त्यस्त्राय फट् ॥ श्रीकृष्णप्रीत्या

र्थे पाठे विनियोगः ॥ इति षडंग
न्यासः ॥ अथ ध्यानं ॥ ॐ पार्थाय
प्रतिबोधितां भगवता नारा-
यणेन स्वयं ॥ व्यासेन ग्रथितां

गी
९

पुराणमुनिनामध्येमहाभा
रते॥ अद्वैतामृतवर्षिणीभग
वतीमष्टादशाध्यायिनी॥ अं
बत्वामनुसंदधामिभगव।

श्रीतेभवद्दिषिणी ॥ १ ॥ नमोस्तु
तेव्यासविशालबुद्धेफुल्लार
विंदायतपत्रनेत्र ॥ येनत्वया
भारततैलपूर्णः प्रज्वालितो

गी
८

ज्ञानमयः प्रदीपः ॥ ३ ॥ प्रपन्न
पारिजातायतोत्रवेत्रैकपाणये
ज्ञानमुद्रायकृष्णायगीतामृत
दुहेनमः ॥ ४ ॥ सर्वोपनिषदोगा

वोदोग्धागोपालनंदनः ॥ पा-
र्थोवत्सःसुधीर्भोक्तादुग्धंगी-
तामृतंमहत् ॥ ४ ॥ वसुदेवसु
तंदेवंकंसचाणूरमर्दनं ॥ देव

गी
८

कौपमानेद्कुलेवेदेनतान्दुर्यः॥५
भीष्मेद्रोणातटानयद्दृष्टजला
गंधावनीलोपला॥ प्रालयाद
वतीकूपेणावहिनीकर्णोनेवा

लाऊला ॥ ग्रष्वस्यामविकाणों
होमकाइयौयनावतिनी ।
मोतीणोंविलषपांइवैः ऊका
नदीकैवर्तकेकेणावे ॥ ८ ॥ ।

पापाण्यंवः सर्वेनममलो
गीतार्थंगंयेनकुर्वते ॥ नानाव्या
नककेसंहृतिकष्यामंवेया
नावेधियंतं ॥ लोकेमज्जनबुद्धै

रहारहः पेपीयमानेमुखा ॥ भूया
स्रागतं पंकुजंकलिमलप्रध्वंसि
नः श्रेयसे ॥ मूकं करोति वाचा
लं पंगुं लंघयतेगिरिं ॥ यत्कृपा

गी

९

तमहंवंदेपरमानंदमाधवं ॥८

यंब्रह्मावरुणेंद्ररुद्रमरुतस्तु

न्वंतिदिव्यैस्तवैः॥ वेदैःसांगपद

क्रमोपनिषदैर्गायंतियंसामगा

२८

गाः ॥ ध्यानावस्थिततद्गतेनम
नसापश्यंतियंयोगिनो ॥ यस्यां
तंनविदुःसुरासुरगणादेवाय
तस्मैनमः ॥ २ ॥ इतिध्यानं ॥ अथतत्रा

गी
॥

धृउवाच॥ धर्मक्षेत्रेकुरुक्षेत्रेस
मवेतायुयुत्सवः॥ मामकाः
पांडवाश्चैवकिमकुर्वतसंजय
संजयउवाच॥ दृष्टातुपांडवानी

केषूदंड्येषयनस्तदा ॥ प्राचा
र्येषुपमंगम्यमानावचनमब्र-
वीत ॥ ३ ॥ पश्यैतामंडूकाणा
माचार्यमहंतीचमं ॥ खठ्ठांड

पदपुत्रेणतवशिष्येणधीमता
अत्रशूरामहेष्वासाभीमार्जुन
समायुधि॥ युयुधानोविराट
श्चद्रुपदश्चमहारथः॥४॥धृष्ट

केतुश्चेकितानःकाशिराज
श्चवीर्यवान् ॥ पुरुजित्कुंतिभो
जश्चशैब्यश्चनरपुंगवः ॥५॥ यु
धामन्युश्चविक्रांतउत्तमौजा

गी
१३

श्चवीर्यवान्॥ सौभद्रोद्रौपदेया
श्चसर्वएवमहारथाः॥६॥अ
स्माकंतुविशिष्टायेतान्निबोध
द्विजोत्तम॥ नायकाममसैन्य

स्यसंज्ञार्थंतान्ब्रवीमिते ॥ ७ ॥ भ
वान्भीष्मश्चकर्णश्चकृपश्चस-
मितिंजयः ॥ अश्वत्थामाविक
र्णश्चसौमदत्तिस्तथैवच ॥ ८ ॥

गी
ता

श्रमेचबहवःशूरामदर्थेत्यक्त
जीविताः॥ नानाशस्त्रप्रहरणाः
सर्वेयुद्धविशारदाः॥९॥ अपर्या
प्तंतदस्माकंबलंभीष्माभिरक्षि

दे॥ पर्य्याप्तंत्विदमेतेषांबलंभी
माभिरक्षितं॥ अयनेषु॥१०॥चस
र्वेषुयथाभागमवस्थिताः॥ ।
भीष्ममेवाभिरक्षंतुभवंतःसर्वे

गी

५

र्वएवहि ॥ ११ ॥ तस्यसंजनयन्हर्षंकु

रुवृद्धःपितामहः ॥ सिंहनादंवि

नद्योच्चैःशंखंदध्मौप्रतापवान् ॥

ततःशंखाश्चभेर्यश्चपणवानक

५

गोप्तारः ॥ महेशेवाप्यहंमेनम

शक्रस्तस्मैलोभवत् ॥ ३ ॥ ततःसे

नैवेद्यैर्युक्तैर्महंतिसंदधैनेष्यि।

नौ ॥ माधवःपांडवश्रेष्ठैर्वदितौ।

गी
१८

शंखौप्रदध्मतुः॥१४॥पांचजन्यं
हृषीकेशोदेवदत्तंधनंजयः॥
पौंड्रंदध्मौमहाशंखंभीमकर्मा
वृकोदरः॥१५॥अनंतविजयंरा

जाकुंतीपुत्रोयुधिष्ठिरः ॥ नकुलः
सहदेवश्चसुघोषमणिपुष्पकौ
॥ १६ ॥ काश्यश्चपरमेष्वासः ।
शिखंडीचमहारथः ॥ धृष्टद्यु

गी
९

म्नो विराटश्च सात्यकिश्चापरा
जितः ॥१७॥ द्रुपदो द्रौपदेयाश्च
सर्वशः पृथिवीपते ॥ सौभद्र
श्च महाबाहुः शंखान्दध्मुः पृथ

पृथक् ॥१८॥ सघोषोधार्त्तरा

ष्ट्राणांहृदयानिव्यदारयत् ॥ ।

नभश्चपृथिवींचैवतुमुलोव्य

नुनादयन् ॥१९॥ अथव्यवस्थिता

गी
८

तान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य
पांडवः ॥२०॥ हृषीकेशं तदा वा
क्यमिदमाह महीपते ॥ सेनयो

CC-0 Shri Krishna Museum. An eGangotri-Vedic Bharat Inititative

भयोर्मध्येरथंस्थापयमेच्यु-
त॥२१॥यावदेतान्निरीक्षेहंयो-
द्धुकामानवस्थितान्॥कैर्म-
यासहयोद्धव्यमस्मिन्रणसमु-

गी

१९

यमे ॥ २२ ॥ योत्स्यमानानवेक्षे

हं यएतेत्र समागताः ॥ धार्त

राष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकी

र्षवः ॥ २३ ॥ संजय उवाच ॥ एवमु

क्तोहृषीकेशोगुडाकेशेनभा
रत ॥ सेनयोरुभयोर्मध्येस्था
पयित्वारथोत्तमं ॥ २४ ॥ भीष्म
द्रोणप्रमुखतःसर्वेषांचमहीक्षि

गी

२ः

तां ॥ उवाच पार्थ पश्यैतान्सम
वेतान्कुरूनिति ॥ २५ ॥ तत्रापा
श्यत्स्थितान्पार्थः पितॄनथ पि
तामहान् ॥ आचार्यान्मातुला

ध्यानस्त्रात्मोत्रान्सांलीलथ्या ॥ २८

स्वप्रान्स्वहदश्चैवसेनयोहम

योपि ॥ नास्मीदसकौंते ।

यः सर्वानेप्रनवस्थितान ॥ २१ ॥

कृपयापरयाविष्टोविषीदन्नि
दमब्रवीत् ॥ अर्जुनउवाच ॥
दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमु
पस्थितम् ॥ २८ ॥ सीदंतिममगा

त्राणिमुखंचपरिशुष्यति ॥ वेप
थुश्चशरीरेमेरोमहर्षश्चजा
यते ॥ २९ ॥ गांडीवंस्रंसतेहस्ता
त्त्वक्चैवपरिदह्यते ॥ नचशक्नो

गी
११

मवस्थातुंभ्रमतीवचमेमनः॥३०
निमित्तानिचपश्यामिविपरी
तानिकेशव॥नचश्रेयोनुप
श्यामिहत्वास्वजनमाहवे॥३१॥

नकांक्षेविजयंकृष्णनचराज्यं
सुखानिच॥ किंनोराज्येनगो
विंदकिंभोगैर्जीवितेनवा॥३२
येषामर्थेकांक्षितंनोराज्यंभो

गी
३३

गाःसुखानिच ॥ तइमेवस्थिता

युद्धेप्राणांस्त्यक्त्वाधनानिच

आचार्याःपितरःपुत्रास्तथैवच

पितामहाः ॥ मातुलाःश्वशुराः

३३

पौत्राः स्यालाः संबंधिनस्तथा ॥ ३४

एतान्न हंतुमिच्छामि घ्नतोपि म

धुसूदन ॥ अपि त्रैलोक्यराज्यस्य

हेतोः किं नु महीकृते ॥ ३५ ॥

निहत्यधार्तराष्ट्रान्नःकाप्रीतिः
स्याज्जनार्दन॥पापमेवाश्रयेद
स्मान्हत्वैतानाततायिनः॥३६
तस्मान्नार्हावयंहंतुंधार्तराष्ट्रा

न्स्वबांधवान्॥ स्वजनं हि कथं

हत्वा सुखिनः स्याम माधव॥३७

यद्यप्येते न पश्यंति लोभोपह

तचेतसः॥ कुलक्षयकृतं दोषं

गी
२५

मित्रद्रोहेचपातकं ॥ ३८ ॥ कथंन
ज्ञेयमस्माभिःपापादस्मान्निव
र्तितुं ॥ कुलक्षयकृतंदोषंप्रप
श्यद्भिर्जनार्दन ॥ ३९ ॥ कुलक्षयेप्रण

णश्यंति कुलधर्माः सनातनाः ॥ ध
र्मे नष्टे कुलं कृत्स्नमधर्मोभिभ
वत्युत ॥ ४० ॥ अधर्माभिभवात्कृ
ष्ण प्रदुष्यंति कुलस्त्रियः ॥ स्त्रीषु दु

ष्टासुवार्ष्णेयजायतेवर्णसंकरः
संकरोनरकायैवकुलघ्नानां
कुलस्यच॥ पतंतिपितरोह्ये
षांलुप्तपिंडोदकक्रियाः॥४२॥

दोषैरेतैः कुलघ्नानां वर्णसंकर

कारकैः ॥ उत्साद्यंते जातिध

र्माः कुलधर्माश्च शाश्वताः ॥ ४३

उत्सन्नकुलधर्माणां मनुष्याणां

गी
१२

जनार्दन ॥ नरकेनियतंवासो
भवतीत्यनुशुश्रुम ॥४४॥ अहो
बतमहत्पापंकर्तुंव्यवसिता
वयं ॥ यद्राज्यसुखलोभेनहंतुं

स्वजनमुद्यताः ॥ ४५ ॥ यदिमाम
प्रतीकारमशस्त्रंशस्त्रपाणयः ।
धार्तराष्ट्रारणेहन्युस्तन्मेक्षेमत
रंभवेत् ॥ ४६ ॥ संजयउवाच ॥ एव

गी
१८

मुक्त्वार्जुनः संख्ये रथोपस्थउपा
विशत ॥ विसृज्यसशरंचापंशो
कसंविग्नमानसः ॥ ४७ ॥ इतिश्री
भगवद्गीतासूपनिषत्सुब्रह्मविद्या

यांयोगशास्त्रेश्रीकृष्णार्जुनसंवा

देअर्जुनविषादोनामप्रथमो।

ध्यायः॥१॥संजयउवाच॥तंतथा॥

कृपयाविष्टमश्रुपूर्णाकुले।

क्षणं ॥ विषीदंतमिदंवाक्यमुवा
चमधुसूदनः ॥१॥ श्रीभगवा
नुवाच ॥ कुतस्त्वाकश्मलमिदं
विषमेसमुपस्थितं ॥ अनार्य

ष्टमस्वर्ग्यमकीर्तिकरमर्जु
न॥२॥क्लैब्यंमास्मगमःपार्थ
नैतत्त्वय्युपपद्यते॥क्षुद्रंहृदय
दौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप॥३

अर्जुनउवाच॥ कथंभीष्ममहं
संख्येद्रोणंचमधुसूदन॥ इषु
भिःप्रतियोत्स्यामिपूजार्हावरि
सूदन॥४॥ गुरूनहत्वाहिमहा-

नुभावान्श्रेयोभोक्तुंभैक्ष्यमपी

हलोके॥ हत्वार्थकामांस्तुगु

रूनिहैवभुंजीयभोगान्रुधिर

प्रदिग्धान्॥५॥ नचैतद्विद्मःक

गी
२

रन्नोगरीयोयद्वाजयेमयदि
वानोजयेयुः ॥ यानेवहत्वान
जिजीविषामस्तेवस्थिताःप्रमुखे
धार्तराष्ट्राः ॥ ८ ॥ कार्पण्यदोषो

पहतस्वभावः पृच्छामि त्वां धर्म
संमूढचेताः ॥ यच्छ्रेयः स्यानि
श्चितं ब्रूहि तन्मे शिष्यस्तेहं शा
धि मां त्वां प्रपन्नं ॥ ७ ॥ नहि प्र

गी
३१

पश्यामि ममापनुद्याद्यच्छोक-
मुच्छोषणमिंद्रियाणां ॥ अवा-
प्य भूमावसपत्नमृद्धं राज्यं सुरा-
णामपि चाधिपत्यं ॥८॥ संजय

उवाच॥ एवमुक्त्वाहृषीकेशंगु
डाकेशःपरंतप॥ नयोत्स्यइति
गोविंदमुक्त्वातूष्णींबभूवह॥९
तमुवाचहृषीकेशःप्रहसन्नि।

गी
३३

व भारत ॥ सेनयोरुभयोर्मध्ये वि
षीदंतमिदं वचः ॥ १० ॥ श्रीभगवा
नुवाच ॥ अशोच्यानन्वशोचस्त्वं
प्रज्ञावादांश्च भाषसे ॥ गतासून

गतासूंश्चनानुशोचंतिपंडिताः॥
नत्वेवाहंजातुनासंनत्वंनेमेज
नाधिपाः॥ नचैवनभविष्यामः
सर्वेवयमतःपरं॥१२॥देहिनो।

स्मिन्यथादेहेकौमारंयौवनंज
रा॥तथादेहांतरप्राप्तिर्धीरस्त
त्रनमुह्यति॥१३॥मात्रास्पर्शा
स्तुकौंतेयशीतोष्णसुखदुःख

दः ॥ आगमापायिनोनित्यास्तां
स्तितिक्षस्वभारत ॥ ४ ॥ यंहि
नव्यथयंत्येतेपुरुषंपुरुषर्ष
भ ॥ समदुःखसुखंधीरंसोमृत

गी
२५

त्वायकल्पते ॥१५॥ नासतोविद्य
तेभावोनाभावोविद्यतेसतः ॥
उभयोरपिदृष्टोंतस्त्वनयोस्तत्व
दर्शिभिः ॥१६॥ अविनाशितुतत

द्विद्धियेन सर्वमिदं ततं ॥ विना-
शमव्ययस्यास्य न कश्चित्कर्तु-
मर्हति ॥ १७ ॥ अंतवंत इमे देहा नि-
त्यस्योक्ताः शरीरिणः ॥ अना-

शिनोप्रमेयस्यतस्माद्युध्यस्वभा
रत॥१८॥यएनंवेत्तिहंतारंयश्चै
नंमन्यतेहतं॥उभौतौनविजा
नीतोनायंहंतिनहन्यते॥१९॥न

जायते म्रियते वा कदाचिन्ना

यं भूत्वा भविता वा न भूयः ॥ अ

जो नित्यः शाश्वतोयं पुराणो

न हन्यते हन्यमाने शरीरे ॥ २० ॥ वे

दाविनाशिनंनित्यंयएनमजम
व्ययं ॥ कथंसपुरुषःपार्थ
कंघातयतिहंतिकं ॥२१॥ वासां
सिजीर्णानियथाविहाय ८।

नवानि गृह्णाति नरोपराणि ॥
तथा शरीराणि विहाय जीर्णा।
न्यन्यानि संयाति नवानि देही ॥ २२
नैनं छिंदंति शस्त्राणि नैनं दह।

गी
३८

तिपावकः ॥ नचैनंक्लेदयंत्या
पोनशोषयतिमारुतः ॥ २३ ॥ अ
छेद्योयमदाह्योयमक्लेद्योशो
ष्यएवच ॥ नित्यः सर्वगतः स्था

णुरचलोयंसनातनः॥ २४ ॥ अव्य
क्तोयमचिंत्योयमविकार्यो
यमुच्यते॥ तस्मादेवंविदित्वैनं
नानुशोचितुमर्हसि॥ २५॥ अथ

गी
३९

चैनं नित्यजातं नित्यं वा मन्यसे मृ-
तं ॥ तथापि त्वं महाबाहो नैवं शो-
चितुमर्हसि ॥ २६ ॥ जातस्य हि ध्रु-
वो मृत्युर्ध्रुवं जन्म मृतस्य च ॥ त-

स्मारणपरिहार्यैर्येनतंप्रोविता
र्महेसि ॥ ४ ॥ ग्रथ्यकादीनिभ्रु
वानिथ्यकमध्यानिभावत ॥ ध
यकनिपनालेबतबकापरि

गी
धे॰

देवता ॥ २८ ॥ य्राश्च्यंवसप्यतिकश्चिदेनमाश्च्यंवद्वदतितथैवचान्यः ॥ आश्च्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवेदनचैवकः ।

कश्चित ॥ २९ ॥ देहीनित्यमवध्यो
यंदेहेसर्वस्यभारत ॥ तस्मात्स
र्वाणिभूतानिनत्वंशोचितुमर्ह
सि ॥ ३० ॥ स्वधर्ममपिचावेक्ष्य

गी
भा

नविकंपितमर्हसि ॥ धर्म्याद्धि
युद्धाच्छ्रेयोन्यत्क्षत्रियस्यनवि-
द्यते ॥ ३१ ॥ यदृच्छयाचोपपन्नंस्व
र्गद्वारमपावृतं ॥ सुखिनःक्षत्रि

याःपार्थलभंतेयुद्धमीदृशं॥३२

थचेत्वमिमंधर्म्यंसंग्रामंन

करिष्यसि॥ततःस्वधर्मंकीर्तिं

चहित्वापापमवाप्स्यसि॥३३॥

गी
४०

अकीर्तिंचापिभूतानिकथयि
ष्यंतितेव्ययां ॥ संभावितस्य
चाकीर्तिर्मरणादतिरिच्यते ॥
॥ ३४ ॥ भयाद्रणादुपरतंमं

स्यंतेत्वांमहारथाः ॥ येषांचत्वं
बहुमतोभूत्वायास्यसिलाघ
वं ॥ ३५ ॥ अवाच्यवादांश्चबहूनव
दिष्यंतितवाहिताः ॥ निंदंत

गी
४३

स्तवसामर्थ्यंततोदुःखतरंनुकिं
हतोवाप्राप्स्यसिस्वर्गंजित्वावा
भोक्ष्यसेमहीं ॥ तस्मादुत्तिष्ठकौं
तेययुद्धायकृतनिश्चयः ॥३७॥

सुखदुःखे समे कृत्वा लाभाला

भौ जयाजयौ ॥ ततो युद्धाय युज्य

स्व नैवं पापमवाप्स्यसि ॥ ३८

एषा तेभिहिता सांख्ये बुद्धिर्यो

गी
४४

गेत्विमांश्रृणु ॥ बुध्यायुक्तोयया
पार्थकर्मबंधंप्रहास्यसि ॥ ३९ ॥
नेहाभिक्रमनाशोस्तिप्रत्यवा
योनविद्यते ॥ स्वल्पमप्यस्यध।

र्मस्यत्रायतेमहतोभयात्॥४०॥

व्यवसायात्मिकाबुद्धिरेकेह

कुरुनंदन॥बहुशाखाह्यनंता

श्चबुद्धयोव्यवसायिनां॥४१॥

यामिमांपुष्पितांवाचंप्रवदंत्य
विपश्चितः॥वेदवादरताःपार्थ
नान्यदस्तीतिवादिनः॥४२॥का
मात्मानःस्वर्गपराजन्मकर्मफ

लप्रदां॥ क्रियाविशेषबहुलां

भोगैश्वर्यगतिंप्रति॥४३॥भोगै

श्वर्यप्रसक्तानांतयापहृतचेत

सां॥ व्यवसायात्मिकाबुद्धिः।

गी
४९

समाधौ न विधीयते ॥ ४४ ॥ त्रैगु
ण्यविषया वेदा निस्त्रैगुण्यो भ
वार्जुन ॥ निर्द्वंद्वो नित्यसत्त्वस्थो
निर्योगक्षेम आत्मवान् ॥ ४५ ॥

यावानर्थउदपानेसर्वतःसंप्लु
तोदके॥तावान्सर्वेषुवेदेषुब्रा
ह्मणस्यविजानतः॥४६॥क
र्मण्येवाधिकारस्तेमाफले

गी
४

लेषुकदाचन॥ माकर्मफलहे
तुर्भूर्मातेसंगोस्त्वकर्मणि॥ ४ः॥
योगस्थःकुरुकर्माणिसंगंत्य
क्त्वाधनंजय॥ सिद्ध्यसिद्ध्योःस

मोभूत्वासमत्वंयोगउच्यते॥४८
दूरेणह्यवरंकर्मबुद्धियोगाद्धा
नंजय॥बुद्धौशरणमन्विछकृ
पणाःफलहेतवः॥४९॥बुद्धियु

गी
५८

क्तोजहातीह उभे सुकृतदुष्कृ
ते॥ तस्माद्योगाय युज्यस्व योग
कर्मसुकौशलं॥५०॥ कर्मजं बु
द्धियुक्ताहि फलं त्यक्त्वा मनीषि

णः ॥ जन्मबंधविनिर्मुक्ताः पदं
गच्छंत्यनामयं ॥५१॥ यदा ते मोह
कलिलं बुद्धिर्व्यतितरिष्यति ॥ ।
तदा गंतासि निर्वेदं श्रोतव्यस्य ।

श्रुतस्य च ॥५२॥ श्रुतिविप्रतिप
न्नाते यदा स्थास्यति निश्चला ।
समाधावचलाबुद्धिस्तदायोग
मवाप्स्यसि ॥५३॥ अर्जुनउवाच

स्थितप्रज्ञस्यकाभाषासमाधि

स्थस्यकेशव॥स्थितधीःकिंप्र

भाषेतकिमासीतव्रजेतकिं॥ ५४

श्रीभगवानुवाच॥ प्रजहातिय-

दा कामान्सर्वान्पार्थ मनोगता
न् ॥ आत्मन्येवात्मना तुष्टः स्थि
तप्रज्ञस्तदोच्यते ॥ ५५ ॥ दुःखेष्व
नुद्विग्नमनाः सुखेषु विगतस्पृ

हः ॥ वीतरागभयक्रोधः स्थि
तधीः मुनिरुच्यते ॥ ५६ ॥ यः स
र्वत्रानभिस्नेहस्तत्तत्प्राप्य शु
भाशुभं ॥ नाभिनंदति न द्वेष्टि

गी
५१

तस्यप्रज्ञाप्रतिष्ठिता ॥ ५७ ॥ यदा
संहरतेचायंकूर्मोंगानीवस
र्वशः ॥ इंद्रियाणींद्रियार्थेभ्य
स्तस्यप्रज्ञाप्रतिष्ठिता ॥ ५८ ॥ :

विषयाविनिवर्त्तंतेनिराहारस
स्यदेहिनः॥रसवर्जंरसोप्यस्या
परंदृष्ट्वानिवर्त्तते॥५९॥यता
तोह्यपिकौंतेयपुरुषस्यविपः

पश्चितः ॥ इंद्रियाणिप्रमाथी
निहरंतिप्रसभंमनः ॥६०॥ तानि
सर्वाणिसंयम्ययुक्तआसीत-
मत्परः ॥ वशेहियस्येंद्रियाणि

तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥ ध्या
यतो विषयान्पुंसः संगस्तेषूप
जायते ॥ संगात्संजायते कामः
कामात्क्रोधोभिजायते ॥६२॥

क्रोधाद्भवतिसंमोहःसंमोहा
त्स्मृतिविभ्रमः॥स्मृतिभ्रंशा
द्बुद्धिनाशोबुद्धिनाशात्प्रणश्य
ति॥६३॥रागद्वेषवियुक्तैस्तुवि

बयानिंद्रियैस्त्वरन् ॥ प्राणमवैष्ये
विधेयान्मा प्रमादमधिगच्छे-
त् ॥ ८४ ॥ प्रमादे सर्वदुःखानां
हानिरस्योपजायते ॥ प्रमत्तचे

तसोह्याशुबुद्धिः पर्यवतिष्ठते
६५॥ नास्तिबुद्धिरयुक्तस्यनचा
युक्तस्यभावना॥ नचाभा
वयतः शांतिरशांतस्यकुतः

स्मृतं॥८८॥इंद्रियाणांहिचरतां
यन्मनोनुविधीयते॥तदस्यहर
तिप्रज्ञांवायुर्नावमिवांभसि॥८
तस्माद्यस्यमहाबाहोनिगृहीता

नानि सर्वशः ॥ इंद्रियाणींद्रि
यार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता
यानिशा सर्वभूतानांतस्यांजा
गर्ति संयमी ॥ यस्यांजाग्रति भू

तानि सा निशा पश्यतो मुनेः ॥८

आपूर्यमाणमचलप्रतिष्ठं सम

द्रमापः प्रविशंति यद्वत् ॥ त

द्वत्कामा यं प्रविशंति सर्वे स शां

तिमाप्नोति न कामकामी ॥७०॥
विहाय कामान्यः सर्वान्पुमां
श्चरति निस्पृहः ॥ निर्ममो निरहं
कारः स शांतिमधिगछति ॥७१॥

एषाब्राह्मीस्थितिःपार्थनैनां
प्राप्यविमुह्यति॥स्थित्वास्यामं
तकालेपिब्रह्मनिर्वाणमृ
च्छति॥७२॥इतिश्रीभगवद्गीता

गी

५२

सूपनिषत्सु ब्रह्मविद्यायां योगशा
स्त्रे श्रीकृष्णार्जुनसंवादे सां
ख्ययोगो नाम द्वितीयोऽध्यायः ॥ २
अर्जुन उवाच ॥ ज्यायसी चेत्कर्म

५८

णस्तेमताबुद्धिर्जनार्दन॥ त-
त्किंकर्मणिघोरेमांनियोज-
यसिकेशव॥ १॥ व्यामिश्रेणे-
ववाक्येनबुद्धिंमोहयसीवमे।

तदेकंवदनिश्चित्ययेनश्रेयो
हमाप्नुयां ॥२॥ श्रीभगवानुवा
च॥ लोकेस्मिन्द्विविधानिष्ठा
पुराप्रोक्तामयानघ ॥ ज्ञानयो

येनसांख्यानांकर्मयोगेनयो

गिनां ॥ ३ ॥ नकर्मणामनारं

भान्नैष्कर्म्यंपुरुषोश्नुते ॥ नच

संन्यसनादेवसिद्धिंसमधिग

गी
५९

च्छति ॥ ४ ॥ नहिकश्चित्क्षणम
पिजातुतिष्ठत्यकर्मकृत् ॥ का
र्यतेह्यवशःकर्मसर्वःप्रकृति
जैर्गुणैः ॥ ५ ॥ कर्मेन्द्रियाणि

संयम्ययआस्तेमनसास्मरन्॥
इंद्रियार्थान्विमूढात्मामिथ्या
चारःसउच्यते॥६॥यस्त्विंद्रि
याणिमनसानियम्यारभते॥

गी

८

र्जुन ॥ कर्मेन्द्रियैः कर्मयोगमा
मसक्तः स विशिष्यते ॥ ७ ॥ नि
यतं कुरु कर्म त्वं कर्म ज्यायो ह्य
कर्मणः ॥ शरीरयात्रापि च ते ।

नप्रसिद्धेदकर्मणः ॥ ८ ॥ यज्ञा
र्थात्कर्मणोन्यत्रलोकोयंक-
र्मबंधनः ॥ तदर्थंकर्मकौंते-
यमुक्तसंगः समाचर ॥ ९ ॥ ः

गी
८१

सहयज्ञाःप्रजाःसृष्ट्वापुरोवाच
प्रजापतिः॥अनेनप्रसविष्यध्व
मेषवोस्त्विष्टकामधुक्॥१०॥
देवान्भावयतानेनतेदेवाभा

वयंतुवः॥ परस्परंभावयंतः।
श्रेयः परमवाप्स्यथ॥ ॥ इष्टा
न्भोगान्हिवोदेवादास्यंतेयज्ञ
भाविताः॥ तैर्दत्तानप्रदायैभ्यो

गी
९

यो भुंक्ते स्तेन एव सः ॥ १२ ॥ यज्ञ
शिष्टाशिनः संतो मुच्यंते सर्व
किल्बिषैः । भुंजते ते त्वघं पापा
ये पचंत्यात्मकारणात् ॥ १३ ॥ य

न्नाद्भवंतिभूतानिपर्जन्यादन्न
संभवः॥ यज्ञाद्भवतिपर्जन्यो
यज्ञः कर्मसमुद्भवः॥१४॥ क
र्मब्रह्मोद्भवंविद्धिब्रह्माक्षरस

गी
८३

मुद्भवं॥ तस्मात्सर्वगतंब्रह्म।
नित्यंयज्ञेप्रतिष्ठितं॥१५॥एवं
प्रवर्तितंचक्रंनानुवर्तयतीह
यः॥ अघायुरिंद्रियारामोमोघं

पार्थसजीवति ॥१६॥ यस्त्वात्मा
रतिरेवस्यादात्मतृप्तश्चमानवः
॥ आत्मन्येवचसंतुष्टस्तस्य ।
कार्यंनविद्यते ॥१७॥ नैवतस्य

गी
५४

कृतेनार्थो नाकृतेनेह कश्चन
न चास्य सर्वभूतेषु कश्चिद
र्थव्यपाश्रयः ॥१८॥ तस्मादस
क्तः सततं कार्यं कर्म समाचर

।॥ असक्तोह्याचरन्कर्मपरमा
प्नोतिपूरुषः॥१९॥कर्मणैव।
हिसंसिद्धिमास्थिताजनका।
दयः॥लोकसंग्रहमेवापिसं

गी
८५

पश्यन्कर्तुमर्हसि ॥२०॥ यद्यदा
चरतिश्रेष्ठस्तत्तदेवेतरोजनः
सयत्प्रमाणंकुरुतेलोकस्त
दनुवर्तते ॥२१॥ नमेपार्थास्ति

कर्तव्यं त्रिषु लोकेषु किंचन ॥
नानवाप्तमवाप्तव्यं वर्त एव च।
कर्मणि ॥ २२ ॥ यदि ह्यहं न
वर्तेयं जातु कर्मण्यतंद्रितः ॥

गी
८८

ममवर्त्मानुवर्त्तंतेमनुष्याःपा
र्थसर्वशः ॥२३॥ उत्सीदेयुरिमे
लोकानकुर्यांकर्मचेदहं ॥
संकरस्यचकर्त्तास्यामुपहा

न्यामिमां प्रजाः ॥ २४ ॥ सक्ताः ।
कर्मण्यविद्वांसो यथा कुर्वंति भा
रत ॥ कुर्याद्विद्वांस्तथासक्त।
श्चिकीर्षुर्लोकसंग्रहं ॥ २५ ॥ ८

गी
८२

नबुद्धिभेदंजनयेदज्ञानांकर्म
संगिनां॥जोषयेत्सर्वकर्माणि
विद्वान्युक्तःसमाचरन्॥२६॥
प्रकृतेंक्रियमाणानिगुणैः।

कर्माणि सर्वशः ॥ अहंकारा
विमूढात्मा कर्ताहमिति म
न्यते ॥ २ ॥ तत्ववित्तु महाबाहो
गुणकर्मविभागयोः ॥ गुणा

श्री
८८

गुणेषुवर्त्तंतेइतिमत्वानस
ज्जते॥२८॥प्रकृतेर्गुणसंमूढा
स्सज्जंतेगुणकर्मसु॥तानकृ
त्स्नविदोमंदान्कृत्स्नविन्न:

विचालयेत् ॥२९॥ मयि सर्वा-
णि कर्माणि संन्यस्याध्यात्मचे-
तसा ॥ निराशीर्निर्ममो भूत्वा-
युध्यस्व विगतज्वरः ॥३०॥ ये-

मेमतमिदंनित्यमनुतिष्ठंति-
मानवाः॥श्रद्धावंतोनसूयं-
तोमुच्यंतेतेपिकर्मभिः॥३१॥
येत्वेतदभ्यसूयंतोनानुतिष्ठं

तिमेमते ॥ सर्वज्ञानविमूढां
स्तान्विद्धिनष्टानचेतसः ॥ ३२ ॥
सदृशंचेष्टतेस्वस्याः प्रकृते ।
र्ज्ञानवानपि ॥ प्रकृतिंयांति ।

गी
७०

भूतानिनिग्रहःकिंकरिष्य
ति॥३३॥इंद्रियस्येंद्रियस्यार्थे
रागद्वेषौव्यवस्थितौ॥तयोर्न
वशमागछेत्तौह्यस्यपरिपं

न्थिनौ ॥ ३४ ॥ श्रेयान्स्वधर्मो वि
गुणः परधर्मात्स्वनुष्ठितात् ॥
स्वधर्मे निधनं श्रेयः परधर्मो
भयावहः ॥ ३५ ॥ अर्जुन उवाच ॥

गी
७१

अथकेनप्रयुक्तोयंपापंचरा
तिपूरुषः॥ अनिच्छन्नपिवार्ष्णे
यबलादिवनियोजितः॥ ३६
श्रीभगवानुवाच॥ कामएषक्रो

पएषरजोगुणसमुद्भवः॥मा
हाशनोमहापाप्माविद्धेनमि
हवैरिणं॥३७॥धूमेनाव्रियतेव
ह्निर्यथादर्शोमलेनच॥८

यथोल्बेनावृतोगर्भस्तथाते
नेदमावृतं ॥ आवृतंज्ञानमेते
नज्ञानिनोनित्यवैरिणा ॥ का
मरूपेणकौंतेयदुष्पूरेणान

लेनच ॥ ३९ ॥ इंद्रियाणिमनो
बुद्धिरस्याधिष्ठानमुच्यते ॥ ए
तैर्विमोहयत्येषज्ञानमावृत्य
देहिनं ॥ ४० ॥ तस्मात्वमिंद्रिया

गी
७३

ण्यादौनियम्यभरतर्षभ॥पाप्मा
नंप्रजहिह्येनंज्ञानविज्ञाना
नाशनं॥४१॥इंद्रियाणिपरा
ण्याहुरिंद्रियेभ्यःपरंमनः॥।

मनसस्तु पराबुद्धिर्यो बुद्धेः प
रतस्तु सः ॥ ४२ ॥ एवं बुद्धेः प
रं बुद्ध्वा संस्तभ्यात्मानमात्मा
ना ॥ जहि शत्रुं महाबाहो का

गी
७४

मरूपंदुरासदं॥४३॥इतिश्री॥
भगवद्गीतासूपनिषत्सुब्रह्मवि
द्यायांयोगशास्त्रेश्रीकृष्णार्जुन
संवादेकर्मयोगोनामतृतीयो

22

ध्यायः ॥३॥ श्रीभगवानुवाच ॥ इ
मं विवस्वते योगं प्रोक्तवानह
मव्ययं ॥ विवस्वान्मनवे प्रा
ह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥

गी
५

एवंपरंपराप्राप्तमिमंराजर्षयो
विदुः ॥ सकालेनेहमहता
योगोनष्टःपरंतप ॥२॥ सए
वायंमयातेय योगःप्रोक्तः

पुरातनः ॥ भक्तोसिमेसखा
चेतिरहस्यंह्येतदुत्तमं ॥ ३ ॥ अ
र्जुनउवाच ॥ अपरंभवतोजन्म
परंजन्मविवस्वतः ॥ कथमे

गी
१८

तद्विजानीयांत्वमादौप्रोक्तवा
निति ॥४॥ श्रीभगवानुवाच ॥ ब
हूनिमेव्यतीतानिजन्मानित
वचार्जुन ॥ तान्यहंवेदसर्वा

णि न त्वं वेत्थ परंतप ॥ ५ ॥ अजो
पि सन्नव्ययात्मा भूतानामीश्व
रो पि सन् ॥ प्रकृतिं स्वामधिष्ठा
य संभवाम्यात्ममायया ॥ ६ ॥

गी
७७

यदा यदा हि धर्मस्य ग्लानिर्भव
ति भारत ॥ अभ्युत्थानमधर्म
स्य तदात्मानं सृजाम्यहं ॥७॥
परित्राणाय साधूनां विनाशा

यचदुष्कृतां ॥ धर्मसंस्थापना
र्थायसंभवामियुगेयुगे ॥८॥
जन्मकर्मचमेदिव्यमेवंयोवे
त्तितत्वतः ॥ त्यक्त्वादेहंपुनर्ज

न्म नैति मामेति सोर्जुन ॥९॥
वीतरागभयक्रोधा मन्मया
मामुपाश्रिताः ॥ बहवो ज्ञान-
तपसा पूता मद्भावमागताः ॥१०॥

येयथामांप्रपद्यंतेतांस्तथैव
भजाम्यहं ॥ ममवर्त्मानुवर्तंते
मनुष्याःपार्थसर्वशः॥११॥
कांक्षंतःकर्मणांसिद्धिंयजं

नइहदेवताः॥ क्षिप्रंहिमानुषे
लोकेसिद्धिर्भवतिकर्मजा॥१२
चातुर्वर्ण्यंमयासृष्टंगुणक
र्मविभागशः॥ तस्यकर्तारम

पिमांविध्यकर्तारमव्ययं ॥ १३ ॥
नमांकर्माणिलिंपंतिनमे
कर्मफलेस्पृहा ॥ इतिमांयो
भिजानातिकर्मभिर्नसबध्य

गी
८

ते ॥ एवंज्ञात्वाकृतंकर्मपूर्वैर
पिमुमुक्षुभिः ॥ कुरुकर्मैवत
स्मात्त्वंपूर्वैःपूर्वतरंकृतं ॥ १५ ॥ किं
कर्मकिमकर्मेतिकवयोप्य

त्रमोहिताः ॥ तत्तेकर्मप्रवक्ष्या

मियज्ज्ञात्वामोक्ष्यसेशुभात् ॥ १६

कर्मणोह्यपिबोद्धव्यंबोद्धव्यं

चविकर्मणः ॥ अकर्मणश्च

बोद्धव्यं गहना कर्मणो गतिः ।
कर्मण्यकर्म यः पश्येदकर्म
णि च कर्म यः ॥ स बुद्धिमान्म
नुष्येषु स युक्तः कृत्स्नकर्मकृ

त् ॥ १८ ॥ यस्य सर्वे समारंभाः

कामसंकल्पवर्जिताः ॥ ज्ञा

नाग्निदग्धकर्माणं तमाहुः प

ण्डितं बुधाः ॥ १९ ॥ त्यक्ता का

गी
८२

र्मफलासंगंनित्यतृप्तोनिरा-
श्रयः ॥ कर्मण्यभिप्रवृत्तोपि-
नैवकिंचित्करोतिसः ॥२०॥ नि
राशीर्यतचित्तात्मात्यक्तस-

र्वपरिग्रहः॥ शारीरंकेवलंक
र्मकुर्वन्नाप्नोतिकिल्बिषं॥२१॥
यदृच्छालाभसंतुष्टोद्वंद्वाती
तोविमत्सरः॥ समःसिद्धावा

गी
८२

सिद्धौचकृत्वापिननिबध्यते ॥ गतसंगस्यमुक्तस्यज्ञानावस्थितचेतसः ॥ यज्ञायाचरतःकर्मसमग्रंप्रविलीयते ॥२३॥

४

ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्र
ह्मणाहुतं॥ब्रह्मैवतेनगंत
व्यंब्रह्मकर्मसमाधिना॥२४
दैवमेवापरेयज्ञंयोगिनःपा

युपासते ॥ ब्रह्माग्नावपरे यज्ञं
यज्ञेनैवोपजुह्वति ॥ २५ ॥ श्रो-
त्रादीनींद्रियाण्यन्ये संयमा-
ग्निषु जुह्वति ॥ शब्दादीन्विष-

यानन्यइंद्रियाग्निषुजुह्वति॥२६

सर्वाणींद्रियकर्माणिप्राण

कर्माणिचापरे॥आत्मसंयम

योगाग्नौजुह्वतिज्ञानदीपिते॥२७

द्रव्ययज्ञास्तपोयज्ञायोगय
ज्ञास्तथापरे॥ स्वाध्यायज्ञान
यज्ञाश्चयतयःसंशितव्रताः॥२
अपानेजुह्वतिप्राणंप्राणेपा

नेतथापरे ॥ प्राणापानगती
रुध्वाप्राणायामपरायणाः ॥
॥ २९ ॥ अपरेनियताहाराः ।
प्राणान्प्राणेषुजुह्वति ॥ स

वैष्णवेयज्ञविदोयज्ञक्षपितक
ल्मषाः॥३०॥यज्ञशिष्टामृ
तभुजोयांतिब्रह्मसनातनं
॥नायंलोकोस्त्ययज्ञस्यकु।

200

तोन्यः कुरुसत्तम॥३१॥ एवंब

हुविधायज्ञाविततात्रह्मणो।

मुखे॥ कर्मजान्विद्धितान्स।

र्वानेवंज्ञात्वाविमोक्ष्यसे॥३२॥

गी
८२

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः
परंतप॥सर्वंकर्माखिलंपार्थ
ज्ञानेपरिसमाप्यते॥३३॥
तद्विद्धिप्रणिपातेनपरिप्रश्ने

नसेवया॥ उपदेक्ष्यंतितेज्ञानं
ज्ञानिनस्तत्वदर्शिनः॥३४॥
यज्ज्ञात्वानपुनर्मोहमेवंया।
स्यसिपांडव॥ येनभूतान्यशेषे

२०२

गी
८८

षेणद्रक्ष्यस्यात्मन्यथोमयि॥३५
अपिचेदसिपापेभ्यः सर्वेभ्यः
पापकृत्तमः॥ सर्वंज्ञानप्लवे
नैववृजिनंसंतरिष्यसि॥३६॥

यथैधांसिसमिद्धोग्निर्भस्मा
सात्कुरुतेर्जुन॥ज्ञानाग्निःस
र्वकर्माणिभस्मसात्कुरुते
तथा॥३७॥नहिज्ञानेनसदृ

गी
८९

शंपवित्रमिहविद्यते ॥ तत्स्वयं
योगसंसिद्धः कालेनात्मनि
विंदति ॥ ३८ ॥ श्रद्धावांल्लभ
तेज्ञानंतत्परः संयतेंद्रियः ॥

ज्ञानंलब्ध्वापरांशांतिमचिरेणा
धिगछति॥३९॥अज्ञश्चा
श्रद्दधानश्चसंशयात्माविन
श्यति॥नायंलोकोस्तिनपरो

गी
९

न सुखं संशयात्मनः ॥ ४० ॥ यो
गसंन्यस्तकर्माणं ज्ञानसंछि
न्नसंशयं ॥ आत्मवंतं न कर्मा-
णि निबध्नंति धनंजय ॥ ४१ ॥ त

स्मादज्ञानसंभूतंहृत्स्थंज्ञाना
सिनात्मनः ॥ छित्वैनंसंशयं।
योगमातिष्ठोत्तिष्ठभारत ॥४२॥
इतिश्रीभगवद्गीतासूपनिषत्सु

गी
२१

ह्मविद्यायांयोगशास्त्रेश्रीकृ
ष्णार्जुनसंवादेकर्मसंन्यासयो
गोनामपंचमोध्यायः॥५॥अ
र्जुनउवाच॥ संन्यासंकर्मणां

106

कृष्णपुनर्योगंचशंससि॥य
च्छ्रेयएतयोरेकंतन्मेब्रूहिसु
निश्चितं॥१॥श्रीभगवानुवाच॥
संन्यासःकर्मयोगश्चनिःश्रे

गी
९२

यसकरावुभौ ॥ तयोस्तु कर्मसं
न्यासात्कर्मयोगो विशिष्यते
॥ २ ॥ ज्ञेयः स नित्यसंन्यासी
यो न द्वेष्टि न कांक्षति ॥ निर्द्वं

हिमहाबाहोसुखंबंधात्प्रमु-
च्यते ॥३॥ सांख्ययोगौपृथग्बा-
लाःप्रवदंतिनपंडिताः ॥४॥
एकमप्यास्थितःसम्यगुभ-

गी
९३

योर्विंदते फलं ॥ ४ ॥ यत्सांख्यैः
प्राप्यते स्थानं तद्योगैरपि गम्य
ते ॥ एकं सांख्यं च योगं च यः प
श्यति स पश्यति ॥ ५ ॥ संन्या

स्तु महाबाहो दुःखमाप्तुम
योगतः ॥ योगयुक्तो मुनिर्ब्र
ह्म नचिरेणाधिगच्छति ॥६॥
योगयुक्तो विशुद्धात्मा विजि

गी
२४

तात्माजितेंद्रियः ॥ सर्वभूता
त्मभूतात्माकुर्वन्नपिनलि
प्यते ॥ ७ ॥ नैवकिंचित्करोमी
तियुक्तोमन्येततत्ववित ॥ प

श्यन्शृण्वन्स्पृशन्जिघ्रन्नश्न

न्गच्छन्स्वपन्श्वसन् ॥८॥ प्रल

पन्विसृजन्गृह्णन्नुन्मिषन्नि

मिषन्नपि ॥ इंद्रियाणींद्रिया

गी
१५

र्थेषुवर्तंतइतिधारयन॥९॥ब्रह्म
ण्याधायकर्माणिसंगंत्यक्त्वा
करोतियः॥लिप्यतेनसपापे
नपद्मपत्रमिवांभसा॥१०॥ड

कायेनमनसाबुध्याकेवलै
रिंद्रियैरपि॥ योगिनःकर्मकु
र्वंतिसंगंत्यक्त्वात्मशुद्धये॥११
युक्तःकर्मफलंत्यक्त्वाशांति

माप्नोतिनैष्ठिकी ॥ अयुक्तः का
मकारेणफलेसक्तोनिबध्य-
ते ॥१२॥ सर्वकर्माणिमनसा-
संसस्यासेसुखंवशी ॥ नवद्वा

रेपुरेदेहीनैवकुर्वन्नकारय-
न्॥१३॥नकर्तृत्वंनकर्माणि
लोकस्यसृजतिप्रभुः॥नक
र्मफलसंयोगंस्वभावस्तुप्र

गी

९

वर्त्तते॥ १४ ॥ नादत्तेकस्यचि

त्पापंनचैवसुकृतंविभुः॥ अज्ञा

नेनावृतंज्ञानंतेनमुह्यंतिजंतवः

ज्ञानेनतुतदज्ञानंयेषांनाशि

223

तमात्मनः तेषामादित्यवज्ज्ञा
नंप्रकाशयतितत्परं ॥ १६ ॥ तद्बु
द्धयस्तदात्मानस्तन्निष्ठास्त
त्परायणाः ॥ गच्छंत्यपुनरावृ॰

गी
२८

ज्ञाननिर्धूतकल्मषाः ॥१७॥
विद्याविनयसंपन्ने ब्राह्मणेग
विहस्तिनि ॥ शुनिचैवश्वपा
केचपंडिताः समदर्शिनः ॥१८

इहैव तैर्जितः सर्गो येषां साम्ये
स्थितं मनः॥ निर्दोषं हि समं
ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः
॥१९॥ न प्रहृष्येत्प्रियं प्राप्य नो

द्विजेत्प्राप्यचाप्रियं ॥ स्थिरबु
द्धिरसंमूढोब्रह्मविद्ब्रह्मणि
स्थितः ॥२०॥ बाह्यस्पर्शेष्व
सक्तात्माविंदत्यात्मनियत्

खं ॥ सब्रह्मयोगयुक्ता

त्मा सुखमक्षयमश्नुते ॥ २१ ॥

येहि संस्पर्शजा भोगा दुःखयो

नय एव ते ॥ आद्यन्तवन्तः

कौंतेयनतेषुरमतेबुधः॥२२
शक्नोतीहैवयःसोढुंप्राक्श
रीरविमोक्षणात्॥काम
क्रोधोद्भवंवेगंसयुक्तःससु

खी नरः ॥२३॥ योंतः सुखोंतरा

रामस्तथांतर्ज्योतिरेव यः ॥

स योगी ब्रह्मनिर्वाणं ब्रह्मभू

तोधिगच्छति ॥२४॥ लभंते

गी
९१

ब्रह्मनिर्वाणमृषयः क्षीण-

कल्मषाः ॥ छिन्नद्वैधा यता-

त्मानः सर्वभूतहिते रताः ॥

॥ २५ ॥ कामक्रोधवियुक्तानां-

यतीनांयतचेतसां ॥ अभि
तोब्रह्मनिर्वाणंवर्ततेवि-
दितात्मनां ॥२६॥ स्पर्शान्कृ
त्वाबहिर्बाह्यांश्चक्षुश्चैवांत-

रेभ्रुवोः ॥ प्राणापानौ समौ
कृत्वा नासाभ्यंतरचारिणौ ॥
२७ ॥ यतेंद्रियमनोबुद्धिर्मुनि
र्मोक्षपरायणः ॥ विगतेच्छाभ

यक्रोधोयःसदामुक्तएवसः

॥२८॥ भोक्तारंयज्ञतपसांस

र्वलोकमहेश्वरं॥ सुहृदंः

सर्वभूतानांज्ञात्वामांशांति

गी
१३

मृच्छति ॥२९॥ इति श्रीभगवद्गी
तासूपनिषत्सु ब्रह्मविद्यायां यो ।
गशास्त्रे श्रीकृष्णार्जुनसंवादे
संन्यासयोगो नाम पंचमोऽध्यायः ॥

श्रीभगवानुवाच॥ अनाश्रितःक
र्मफलंकार्यंकर्मकरोतियः
ससंन्यासीचयोगीचननिर
ग्निर्नचाक्रियः॥ १॥ ॥ यंसं।

न्यासमितिप्राहुर्योगंतंविद्धि
पांडव ॥ नह्यसंन्यस्तसंकल्पो
योगीभवतिकश्चन ॥ २ ॥ ८ ॥
आरुरुक्षोर्मुनेर्योगंकर्मका

220

रणमुच्यते ॥ योगारूढस्यत

स्यैवशमःकारणमुच्यते ॥३॥

यदाहिनेंद्रियार्थेषुनकर्मस्वनु

षज्जते ॥ सर्वसंकल्पसंन्या

गी
१५

सी योगारूढस्तदोच्यते ॥ ४ ॥
उद्धरेदात्मनात्मानं नात्मान
मवसादयेत् ॥ आत्मैव ह्यात्म
नो बन्धुरात्मैव रिपुरात्मनः ॥ ५

बन्धुरात्मात्मनस्तस्य येनात्मै
वात्मना जितः॥ अनात्मनस्तु
शत्रुत्वे वर्तेतात्मैव शत्रुवत्॥ ६॥
जितात्मनः प्रशान्तस्य परमा

गी
२८

त्मासमाहितः॥शीतोष्णसुख
दुःखेषुतथामानापमान
योः॥७॥ज्ञानविज्ञानतृप्तात्मा
कूटस्थोविजितेंद्रियः॥युक्त

इत्युच्यतेयोगीसमलोष्टा

श्मकांचनः॥८॥सुहृन्मित्रा

र्युदासीनमध्यस्थद्वेष्यबंधु

षु॥साधुष्वपिचपापेषुसमा

बुद्धिर्विशिष्यते ॥ ९ ॥ योगी ।
युंजीत सततमात्मानं रहसि ।
स्थितः ॥ एकाकी यतचित्तात्मा
निराशीरपरिग्रहः ॥ १० ॥ शुचौ

देशेप्रतिष्ठाप्यस्थिरमासनमा
त्मनः॥ नात्युच्छ्रितंनाति
नीचंचैलाजिनकुशोत्तरं॥११॥
तत्रैकाग्रंमनःकृत्वायतचि

बुद्धिर्विशिष्यते ॥ ९ ॥ योगी
युंजीत सततमात्मानं रहसि
स्थितः ॥ एकाकी यतचित्तात्मा
निराशीरपरिग्रहः ॥ १० ॥ शुचौ

देशेप्रतिष्ठाप्यस्थिरमासनमा
त्मनः॥ नात्युच्छ्रितंनाति
नीचंचैलाजिनकुशोत्तरं॥११॥
तत्रैकाग्रंमनःकृत्वायतचि

गी
१०८

तेंद्रियक्रियः ॥ उपविश्यासना
नेयुंज्याद्योगमात्मविशुद्धये ॥ २
समंकायशिरोग्रीवंधारयन्न
चलंस्थिरः ॥ संप्रेक्ष्यनासिका

ग्रंस्वंदिशश्चानवलोकयन्॥१

प्रशांतात्माविगतभीर्ब्रह्म

चारिव्रतेस्थितः॥मनःसंय

म्यमच्चित्तोयुक्तआसीतमत्प

३

गी
९४

रः ॥४॥ युंजन्नेवंसदात्मानंयो
गीनियतमानसः ॥ शांतिंनि
र्वाणपरमांमत्संस्थामधिगच्छ
ति ॥१५॥ नात्यश्नतस्तुयोगो

स्तिनचैकांतमनश्नतः ॥ नचा
तिस्वप्नशीलस्यजाग्रतोनैवचा
र्जुन ॥ १६ ॥ युक्ताहारविहार
स्ययुक्तचेष्टस्यकर्मसु ॥ युक्त

स्वप्नावबोधस्य योगो भवति दुः
खहा ॥ १७ ॥ यदा विनियतं चि
त्तमात्मन्येवावतिष्ठते ॥ निस्पृ
हः सर्वकामेभ्यो युक्त इत्युच्यते तदा

दा ॥ १८ ॥ यथादीपोनिवातस्थो
नेंगतेसोपमास्मृता ॥ योगि-
नोयतचित्तस्ययुंजतोयोगमा-
त्मनः ॥ १९ ॥ यत्रोपरमतेचित्तं

रुद्धंयोगसेवया ॥ यत्रचैवात्म
नात्मानंपश्यन्नात्मनितुष्यति
२० ॥ सुखमात्यंतिकंयत्तद्बुद्धिग्रा
ह्यमतींद्रियं ॥ वेत्तियत्रनचैवायं

स्थितश्चलतितत्त्वतः ॥ २१ ॥ यंल
ब्ध्वाचापरंलाभंमन्यतेनाधिकं
ततः ॥ यस्मिंस्थितोनदुःखेन
गुरुणापिविचाल्यते ॥ २२ ॥ तंवि

याद्दुःखसंयोगवियोगंयोगसं
ज्ञितं ॥ सनिश्चयेनयोक्तव्यो
योगोनिर्विण्णचेतसा ॥ २३ ॥ सं
कल्पप्रभवान्कामांस्त्यक्त्वास

र्वानशेषतः ॥ मनसैवेंद्रियग्रा

मंविनियम्यसमंततः ॥ २४ ॥

शनैःशनैरुपरमेद्बुध्याधृति

गृहीतया ॥ आत्मसंस्थंमनः

गी
११३

कृत्वा न किंचिदपि चिंतयेत् ॥ २५
यतो यतो निश्चरति मनश्चंचल
मस्थिरं ॥ ततस्ततो नियम्यैत
दात्मन्येव वशं नयेत् ॥ २६ ॥ प्रशां

तमनसंह्येनंयोगिनंसुखमुत्त

मं॥ उपैतिशांतरजसंब्रह्मभू

तमकल्मषं॥ २७॥ युंजन्नेवंसदा

त्मानंयोगीविगतकल्मषः॥।

गी
११४

सुखेनब्रह्मसंस्पर्शमत्यंतंसुख
मश्नुते ॥२८॥ सर्वभूतस्थमात्मा
नंसर्वभूतानिचात्मनि ॥ ईक्षते।
योगयुक्तात्मासर्वत्रसमदर्शनः

योमांपश्यतिसर्वत्रसर्वंचमा
यिपश्यति॥तस्याहंनप्रणश्या
मिसचमेनप्रणश्यति॥३०॥
सर्वभूतस्थितंयोमांभजत्ये

कत्वमास्थितः ॥ सर्वथावर्त्तमा-
नोपिसयोगीमयिवर्त्तते ॥ ३१
आत्मौपम्येनसर्वत्रसमंपश्य
तियोर्जुन ॥ सुखंवायदिवादुः

त्वंसयोगीपरमोमतः ॥३२॥ अ
र्जुनउवाच ॥ योयंयोगस्त्वया
प्रोक्तः साम्येनमधुसूदन ॥ ए
तस्याहंनपश्यामिचंचलत्वा

गी
११८

नियतेंद्रिया ॥ ३४ ॥ केवलैर्हि-
मनः कृस्नयमाष्विवललवहुं ॥
नमस्कारं नियहं समेवायेरिव
मुद्धकं ॥ ३५ ॥ श्रीभगवानुवा-

व ॥ असंशयं महाबाहो मनो

दुर्निग्रहं चलं ॥ अभ्यासेन तु कौं

न्तेय वैराग्येण च गृह्यते ॥ ३ ॥ अ

संयतात्मना योगो दुष्प्राप इ

गी
११२

तिमेमतिः॥ वश्यात्मनातुय
ततागक्योवाप्तुमुपायतः॥३६
अर्जुनउवाच॥ अयतिः श्रद्धयो
पेतोयोगाच्चलितमानसः॥ अ

प्राप्ययोगसंसिद्धिंकांगतिंकृ
ष्णगच्छति ॥ ३७ ॥ कच्चिन्नोभय
विभ्रष्टश्छिन्नाभ्रमिवनश्यति ॥
अप्रतिष्ठोमहाबाहोविमूढो

गी
११८

ब्रह्मणः पथि ॥ ३८ ॥ एतन्मे सं
शयं कृष्ण छेत्तुमर्हस्यशेषतः
त्वदन्यः संशयस्यास्य छेत्ता न
ह्युपपद्यते ॥ ३९ ॥ श्रीभगवानुव

वा। पार्थनैवेहनामुत्रविनाश

स्तस्यविद्यते॥ नहिकल्याण

कृत्कश्चिद्दुर्गतिंतातगच्छति॥ ४०

प्राप्यपुण्यकृतांलोकानुषि

गी
११९

नामुषित्वाशाश्वतीःसमाः॥शुचीनां।
श्रीमतांगेहेयोगभ्रष्टोभिजा।
यते॥४१॥अथवायोगिनामेव
कुलेभवतिधीमतां॥एतद्धि

लभतरंलोकेजन्मयदीदृशं ॥ ६२

तत्रतंबुद्धिसंयोगंलभतेपौर्वदे

हिकं ॥ यततेचततोभूयः सं

सिद्धौकुरुनंदन ॥ ४३ ॥ पूर्वाभ्या

गी

१२·

सेनतेनैवह्रियतेह्यवशोपि·

सः॥ जिज्ञासुरपियोगस्यशब्द

ब्रह्मातिवर्तते॥४४॥प्रयत्ना

द्यतमानस्तुयोगीसंशुद्धकि·

ल्बिषः॥ अनेकजन्मसंसिद्धस्त

तो याति परांगतिं॥ ४५ ॥ तप

स्विभ्योधिकोयोगीज्ञानिभ्यो

पिमतोधिकः॥ कर्मिभ्यश्चाधि

कोयोगीतस्माद्योगीभवार्जुन॥
योगिनामपिसर्वेषांमद्गतेना
न्तरात्मना॥श्रद्धावान्भजतेयो
मांसमेयुक्ततमोमतः॥४७॥


इतिश्रीभगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायांयोगशास्त्रेश्रीकृ
ष्णार्जुनसंवादेआत्मसंयमयो
गोनामषष्ठोध्यायः॥६॥श्रीम

गी

१२२

गवानुवाच॥ मय्यासक्तमनाः
पार्थयोगंयुंजन्मदाश्रयः॥ अस
शयंसमग्रंमांयथाज्ञास्यसित
च्छृणु॥१॥ ज्ञानंतेहंसविज्ञाना

123



मिदंवक्ष्याम्यशेषतः॥ यज्ज्ञात्वा
नेहभूयोन्यज्ज्ञातव्यमवशिष्य
ते॥२॥मनुष्याणांसहस्रेषुक
श्चिद्यततिसिद्धये॥ यततामपि

सिद्धानांकश्चिन्मांवेत्तितत्वतः
भूमिरापोनलोवायुःखंमनो।
बुद्धिरेवच ॥ अहंकारइतीयंमे
भिन्नाप्रकृतिरष्टधा ॥४॥ अपरे

यमितस्त्वन्यांप्रकृतिंविद्धिमे
परां॥जीवभूतांमहाबाहोय
येदंधार्यतेजगत्॥५॥एतद्यो
नीनिभूतानिसर्वाणीत्युपधा

गी
१२४

य ॥ अहंकृत्स्नस्यजगतःप्र
भवःप्रलयस्तथा ॥ ६ ॥ मत्तःप
रतरंनान्यत्किंचिदस्तिधनंज
य ॥ मयिसर्वमिदंप्रोतंसूत्रेम

णिगणाइव॥७॥रसोहमप्सु
कौंतेयप्रभास्मिशशिसूर्ययोः
॥प्रणवःसर्ववेदेषुशब्दःखे
पौरुषंनृषु॥८॥पुण्योगंधः

गी
१२५

थिव्यांचतेजश्चास्मिविभाव
सौ॥ जीवनंसर्वभूतेषुतपश्चा
स्मितपस्विषु॥९॥ बीजंमांस
र्वभूतानांविद्धिपार्थसनातनं।

नं ॥ बुद्धिर्बुद्धिमतामस्मितेजस्ते
जस्विनामहं ॥ १० ॥ बलंबलवा
तांचाहंकामरागविवर्जितं ॥
धर्माविरुद्धोभूतेषुकामोस्मि

भरतर्षभ ॥११॥ येचैवसात्विका
भावाराजसास्तामसाश्चये ॥ म
त्तएवेतितान्विद्धिनत्वहंतेषुते
मयि ॥१२॥ त्रिभिर्गुणमयैर्भावै

रैभिः सर्वमिदंजगत ॥ मोहि
तंनाभिजानातिमामेभ्यः पर
मव्ययं ॥१३॥ दैवीह्येषागुणम
यीममामायादुरत्यया ॥ मामे

गी
९२

वेयेप्रपद्यंतेमायामेतांतरंति।
ते॥१४॥नमांदुष्कृतिनोमूढाः।
प्रपद्यंतेनराधमाः॥माययाप
हृतज्ञानाआसुरंभावमाश्रि।

ताः ॥१५॥ चतुर्विधाभजंतेमां

जनाः सुकृतिनोर्जुन ॥ आर्तो

जिज्ञासुरर्थार्थीज्ञानीचभरत

र्षभ ॥१६॥ तेषांज्ञानीनित्ययुक्त

गी
१९

एकभक्तिर्विशिष्यते ॥ प्रियो
हि ज्ञानिनोत्यर्थमहं स च मम
प्रियः ॥ १७ ॥ उदाराः सर्व एवैते ज्ञा
नी त्वात्मैव मे मतं ॥ आस्थितः

सहियुक्तात्मामामेवानुत्तमां

गतिं ॥१८॥ बहूनांजन्मनामंते

ज्ञानवान्मांप्रपद्यते ॥ वासुदेवः

सर्वमितिसमहात्मासुदुर्लभः ॥१९

गी
१२५

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंते
न्यदेवताः ॥ तं तं नियममास्था।
य प्रकृत्या नियताः स्वया ॥ २० ॥
यो यो यां यां तनुं भक्तः श्रद्धया।

चितुमिच्छति ॥ तस्यतस्याचलां

श्रद्धांतामेवविदधाम्यहं ॥ २१ ॥

सतयाश्रद्धयायुक्तस्तस्यारा

धनमीहते ॥ लभतेचततःका

गी
१३

मान्मयैवविहितान्हितान् ॥२२
अंतवत्तुफलंतेषांतद्भवत्यल्प
मेधसां ॥ देवान्देवयजोयांति
मद्भक्तायांतिमामपि ॥२३॥ अ

व्यक्तं व्यक्तिमापन्नं मन्यंते माम
बुद्धयः ॥ परंभावमजानंतो मम
माव्ययमनुत्तमं ॥ २४ ॥ नाहं प्र
काशः सर्वस्य योगमायासमा

वृतः॥ मूढोयंनाभिजानाति
लोकोमामजमव्ययं॥२५॥वेदा
हंसमतीतानिवर्तमानानि
चार्जुन॥ भविष्याणिचभूता

निमांतुवेदनकश्चन ॥ २६ ॥ इ
च्छाद्वेषसमुत्थेनद्वंद्वमोहेनभा
रत ॥ सर्वभूतानिसंमोहंस
र्गेयांतिपरंतप ॥ २७ ॥ येषां

गी
१२

नैनगंनैपावंजनानांगुणका
मेंगां॥ नैहंहमोहनिश्रुकाम
नैनैमोंहठशना॥२८॥जनाम
गामेनायमामाश्चिमयनं

तिये ॥ तेब्रह्मतद्विदुःकृत्स्नम
ध्यात्मंकर्मचाखिलं ॥ २९ ॥ सा
धिभूताधिदैवंमांसाधियज्ञंच
येविदुः ॥ प्रयाणकालेपिच

गी

३३

मांतेविदुर्युक्तचेतसः ॥ ३० ॥ इति

श्रीभगवद्गीतासूपनिषत्सुब्र

ह्मविद्यायांयोगशास्त्रेश्रीकृष्णा

र्जुनसंवादेज्ञानविज्ञानयोगोना

अथाष्टमोध्यायः॥८॥ अर्जुनउवाच

किंतद्ब्रह्मकिमध्यात्मंकिंक-
र्मपुरुषोत्तम॥ अधिभूतंचकिं-
प्रोक्तमधिदैवंकिमुच्यते॥१॥

गी
अ८

धियज्ञःकथंकोत्रदेहेस्मिन्मा
धुसूदन ॥ प्रयाणकालेचकं
थंज्ञेयोसिनियतात्मभिः ॥२॥
श्रीभगवानुवाच ॥ अक्षरंब्रह्मप

मं स्वभावोध्यात्ममुच्यते॥ भूत

भावोद्भवकरोविसर्गःकर्म

संज्ञितः॥३॥ अधिभूतंक्षरोभा

वःपुरुषश्चाधिदैवतं॥ अधिय

गी
१४५

ञोहमेवात्रदेहेदेहभृतांवर
अंतकालेचमामेवस्मरन्मुक्त्वा
कलेवरं॥यःप्रयातिसमद्भावं
यातिनास्त्यत्रसंशयः॥५॥यं

वापिस्मरन्भावंत्यजत्यंतेकले
वरं॥ तंतमेवैतिकौंतेयसदा
तद्भावभावितः॥६॥तस्मात्स
र्वेषुकालेषुमामनुस्मरयुध्य

गी
१३८

वे ॥ मय्यर्पितमनोबुद्धिर्मामेवै
ष्यस्यसंशयः ॥ ७ ॥ अभ्यासयो
गयुक्तेनचेतसानान्यगामिना
परमंपुरुषंदिव्यंयातिपार्था

त्रविंनयन ॥८॥ कविंशुरानाम
तुष्टासिनाशमरोगाश्राणीयंसा
मतुष्मेघः ॥ सर्वेस्पयानाम
विंयहपमादिसवर्णोनममः

गी
८

परस्तात् ॥९॥ प्रयाणकालेम

नसाचलेनभक्त्यायुक्तोयोग

बलेनचैव ॥ भ्रुवोर्मध्येप्राण

मावेश्यसम्यक्सतंपरंपुरुष

मुपैति दिव्यं ॥१०॥ यदक्षरं वेदवि
दो वदंति विशंति यद्यतयो वीत
रागाः ॥ यदिच्छंतो ब्रह्मचर्यं च
रंति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥११॥

गी
१३८

सर्वद्वाराणि संयम्य मनो हृदि
निरुध्य च ॥ मूर्ध्न्याधायात्मनः
प्राणमास्थितो योगधारणां ॥ १२
ओमित्येकाक्षरं ब्रह्म व्याहरन्मा

मनुस्मरन् ॥ यः प्रयाति त्यजन्दे
हं सयाति परमां गतिं ॥ ३ ॥ अ
नन्यचेताः सततं यो मां स्मरति
नित्यशः ॥ तस्याहं सुलभः पा

र्थनित्ययुक्तस्ययोगिनः ॥ १४ ॥ मा
मुपेत्यपुनर्जन्मदुःखालयमशा
श्वतं ॥ नाप्नुवंतिमहात्मानः
संसिद्धिंपरमांगताः ॥ १५ ॥ आब्र

ह्मभुवनाल्लोकाः पुनरावर्ति-

नोर्ज्जुन ॥ मामुपेत्यतुकौंतेय

पुनर्जन्मनविद्यते ॥ १६ ॥ सह

स्रयुगपर्यंतमहर्यद्ब्रह्मणोवि

गी
२४

रुः ॥ नाविंशुणासरखोनोनेहोग
३विदैतेननाः ॥ ७ ॥ श्रुखमक्षा ।
हाकयः सर्वेः श्रभवेसहाग
मे ॥ नाम्पानामेपलीयंवेनचैवा

व्यक्तसंज्ञके ॥ १८ ॥ भूतग्रामः स

एवायं भूत्वा भूत्वा प्रलीयते ॥ ।

रात्र्यागमेऽवशः पार्थ प्रभवत्य

हरागमे ॥ १९ ॥ परस्तस्मात्तु भा

गी
५५

वोन्योव्यक्तोव्यक्तात्सनातनः
यःससर्वेषुभूतेषुनश्यत्सुन
विनश्यति॥२०॥अव्यक्तोक्षरइ
त्युक्तस्तमाहुःपरमांगतिं॥यं

प्राप्यननिवर्त्तंतेतद्धामपरमां

मम॥२१॥पुरुषःसपरःपार्थ

भक्त्यालभ्यस्त्वनन्यया॥यस्यां

तःस्थानिभूतानियेनसर्वमि

गी
४२

दंततं ॥ २२ ॥ यत्रकालेत्वनावृत्तिमावृत्तिंचैवयोगिनः ॥ प्रयातायांतितंकालंवक्ष्यामिभरतर्षभ ॥ २३ ॥ अग्निर्ज्योतिरहः शुक्लः

षण्मासा उत्तरायणं ॥ तत्रप्र-
याता गच्छन्ति ब्रह्म ब्रह्मविदोः
जनाः ॥ २४ ॥ धूमो रात्रिस्तथा
कृष्णः षण्मासा दक्षिणायनं

गी
१४५

त्रचांद्रमसंज्योतिर्योगीप्राप्य
निवर्तते ॥ २५ ॥ शुक्लकृष्णेगते
ह्येतेजगतःशाश्वतेमते ॥ एक
यायात्यनावृत्तिमन्ययावर्तते।

पुनः ॥ २६ ॥ नैतेसृतीपार्थजा

नन्योगीमुह्यतिकश्चन ॥ तस्मा

त्सर्वेषुकालेषुयोगयुक्तोभ

वार्जुन ॥ २७ ॥ वेदेषुयज्ञेषुतपः

सुचैवदानेषुयत्पुण्यफलंप्रदि
ष्टं॥ अत्येतितत्सर्वमिदंविदि
त्वायोगीपरंस्थानमुपैतिचा
द्यं॥ इतिश्रीभगवद्गीतासूपनिषत्सु

ब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णा

र्जुनसंवादेमहापुरुषयोगो।

नामअष्टमोध्यायः॥८॥९॥श्रीभ

गवानुवाच॥ इदंतुतेगुह्यत।

गी

१४

मंप्रवक्ष्याम्यनसूयवे ॥ ज्ञानंवि

ज्ञानसहितंयज्ज्ञात्वामोक्ष्य

सेशुभात् ॥ १ ॥ राजविद्याराज

गुह्यंपवित्रमिदमुत्तमं ॥ प्रत्य

त्वावगामंपर्यंसम्हवेकत्वैमा

ग्ये ॥ २ ॥ अश्वद्यनाःशृहषाथ

मेस्वास्पपांतव ॥ अग्राण्यमो।

निवंतैनेमृत्पुसंसारवर्मेति ॥

२

गी
१५८

मयाततमिदंसर्वंजगदव्यक्त
मूर्तिना॥ मत्स्थानिसर्वभूता
निनचाहंतेषववस्थितः॥४॥न
चमत्स्थानिभूतानिपश्यमे

योगमैश्वरं॥ भूतभृन्नचभूत
स्थोममात्माभूतभावनः॥५
यथाकाशस्थितोनित्यंवा
युःसर्वत्रगोमहान्॥तथास

गी
१७

र्वाणिभूतानिमत्स्थानीत्युप
धारय॥६॥सर्वभूतानिकौंते-
यप्रकृतिंयांतिमामिकां॥क
ल्पक्षयेपुनस्तानिकल्पादौ।

विसृजाम्यहं ॥ ७ ॥ प्रकृतिं स्वा

मवष्टभ्य विसृजामि पुनः पु

नः ॥ भूतग्राममिमं कृत्स्नम

वशं प्रकृतेर्वशात् ॥ ८ ॥ न चमा

गी
१५८

मांतानिकर्माणिनिबध्नंतिध
नंजय॥उदासीनवदासीनमा
मसक्तंतेषुकर्मसु॥९॥मया
ध्यक्षेणप्रकृतिःसूयतेसचरा

रं॥ हेतुनानेनकौंतेयजग

द्विपरिवर्तते॥ १०॥ अवजानंति

मांमूढामानुषींतनुमाश्रितं

परंभावमजानंतोममभूतम

हेश्वरं ॥ ११ ॥ मोघाशा मोघकर्मा
णो मोघज्ञाना विचेतसः ॥ राक्ष
सीमासुरीं चैव प्रकृतिं मोहि
नीं श्रिताः ॥ १२ ॥ महात्मानस्तु मां

पार्थं दैवीं प्रकृतिमाश्रिताः ॥

भजंत्यनन्यमनसो ज्ञात्वा भू-

तादिमव्ययं ॥ १३ ॥ सततं कीर्त-

यंतो मां यतंतश्च दृढव्रताः ॥

गी
५८

नमस्यंतश्चमांभक्त्यानित्ययु
क्ताउपासते ॥ ४ ॥ ज्ञानयज्ञेन
चाप्यन्येयजंतोमामुपासते ॥
एकत्वेनपृथक्त्वेनबहुधावि

श्वतोमुखं ॥ १५ ॥ अहंक्रतुरहंय

ज्ञः स्वधाहमहमौषधं ॥ मंत्रोह

महमेवाज्यमहमग्निरहंहुतं ॥ १६

पिताहमस्यजगतोमाताधाता

गी
५५

ता पितामहः ॥ वेद्यंपवित्रमों
कारऋक्सामयजुरेवच ॥१७॥ ग
तिर्भर्ताप्रभुःसाक्षीनिवासःश
रणंसुहृत ॥ प्रभवःप्रलयःस्था

नैतिध्यानेवीनमथ्यं ॥८॥न
पापमहमहंबंधंनिगृह्णामास्त्र
स्त्रनामिव ॥ ग्रमहंनैवमस्त्र
ग्रमहमश्चाहमर्जुन ॥९॥नैवि

गी
१५८

यामेभेमणपाहतपाणयसेति
पूसवगोतिंश्राथेंयेते ॥ नेयुगा
मामाहिस्वैंइहलोकमश्रेंतिरि
यारिविदिखभोगान ॥ २ ॥ नते

भुक्त्वास्वर्गलोकंविशालंक्षी
णेपुण्येमर्त्यलोकंविशंति ॥ ।
एवंत्रयीधर्ममनुप्रपन्नागताग
तंकामकामालभंते ॥ २१ ॥ अन

गी
१५२

न्याश्चिंतयंतो मां ये जनाः पर्युपा
सते ॥ तेषां नित्याभियुक्तानां
योगक्षेमं वहाम्यहं ॥२२॥ येप्य
न्यदेवताभक्तायजंते श्रद्धया

न्विताः ॥ तेपिमामेवकौंतेय
यजंत्यविधिपूर्वकं ॥२३॥ अहं
हिसर्वयज्ञानांभोक्ताचप्रभुरे
वच ॥ नतुमामभिजानंतिते

त्वेनातश्च्यवंति ते ॥ २४ ॥ यांति
देवव्रता देवान्पितॄन्यांति पितृ
व्रताः ॥ भूतानि यांति भूतेज्या
यांति मद्याजिनोपि मां ॥ २५ ॥

पत्रंपुष्पंफलंतोयंयोमेभक्त्या

प्रयच्छति॥ नदहंभक्त्युपहृतम

श्नामिप्रयतात्मनः॥२६॥यत्क

रोषियदश्नासियज्जुहोषिददा

गी
१५५

सि यत् ॥ यत्तपस्यसि कौंतेय तत
त्कुरुष्व मदर्पणं ॥२७॥ शुभाशु
भफलैरेवं मोक्ष्यसे कर्मबंध
नैः ॥ संन्यासयोगयुक्तात्मा

विमुक्तोमामुपैष्यसि ॥२८॥ स
मोहंसर्वभूतेषुनमेद्वेष्योस्ति
नप्रियः॥ येभजंतितुमांभक्त्या
मयितेतेषुचाप्यहं ॥२९॥ अपि

चेत्सुदुराचारोभजतेमामनन्य
भाक्॥ साधुरेवसमंतव्यः स
म्यग्व्यवसितोहिसः॥ ३०॥ क्षि
प्रंभवतिधर्मात्माशश्वच्छांतिंनि

गछति ॥ कौंतेयप्रतिजानी
हि नमेभक्तः प्रणश्यति ॥ ३१ ॥
मांहिपार्थव्यपाश्रित्ययेपिस्युः
पापयोनयः ॥ स्त्रियोवैश्यास्त

स्तथाशूद्रास्तेपियांतिपरांगतिं ॥ ३२
किंपुनर्ब्राह्मणाःपुण्याभक्ता
राजर्षयस्तथा ॥ अनित्यमसु
खंलोकमिमंप्राप्यभजस्वमां ॥ ३३

मन्मनाभवमद्भक्तोमद्याजीमां
नमस्कुरु ॥ मामेवैष्यसियुक्त्वै
वमात्मानंमत्परायणः ॥३४
इतिश्रीभगवद्गीतासूपनिषत्सु

गी
१५८

ब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णा
र्जुनसंवादेराजविद्याराजगु
ह्ययोगोनामनवमोध्यायः॥९॥श्री
भगवानुवाच॥भूयएवमहा

159

वाहोप्यणमेणामेवचः॥ यने
हंश्रीयमाणायवदामिहि।
नकामयया॥१॥नमेविङ्गःसा
गणाप्रमंवनमहपेयः॥ प्रहा

गी

१५९

मादिर्हिदेवानांमहर्षीणांचस
र्वशः॥२॥योमामजमनादिंच
वेत्तिलोकमहेश्वरं॥असंमू
ढःसमर्त्येषुसर्वपापैःप्रमुच

ते॥३॥बुद्धिर्ज्ञानमसंमोहःक्षमा
सत्यंदमःशमः॥सुखंदुःखंभ-
वोभावोभयंचाभयमेवच॥अ
हिंसासमतातुष्टिस्तपोदा

गी
१९

नंयशोयशः ॥ भवंतिभावाभू
तानांमत्तएवपृथग्विधाः ॥५॥
महर्षयःसप्तपूर्वेचत्वारोमः
नवस्तथा ॥ मद्भावामानसा ।

जातायेषांलोकइमाःप्रजाः ॥ ६

एतांविभूतिंयोगंचममयोवे

त्तितत्त्वतः ॥ ७ ॥ सोविकंपेनयो

गेनयुज्यतेनात्रसंशयः ॥ ७ ॥

गी
१८१

अहंसर्वस्यप्रभवोमत्तःसर्वंप्र-
वर्त्तते ॥ इतिमत्वाभजंतेमांबु
धाभावसमन्विताः ॥८॥ मच्चि-
त्तामद्गतप्राणाबोधयंतःपर-

स्परं ॥ कथयंतश्चमांनित्यंतुष्यं

तिचरमंतिच ॥९॥ तेषांसतत

युक्तानांभजतांप्रीतिपूर्वकं ॥

ददामिबुद्धियोगंतंयेनमामु

गी
१८

पयांतिते ॥१०॥ तेषामेवानुकं-
पार्थमहमज्ञानजंतमः ॥ ना-
शयाम्यात्मभावस्थोज्ञानदी-
पेनभास्वता ॥११॥ अर्जुनउवाच ॥

परंब्रह्मपरंधामपवित्रंपरमं
भवान्॥ पुरुषंशाश्वतंदिव्यमा
दिदेवमजंविभुं॥१२॥ आहु
स्त्वामृषयःसर्वेदेवर्षिर्नारदा

गी
१८३

दस्तथा ॥ असितो देवलो व्या
सः स्वयं चैव ब्रवीषि मे ॥ १३ ॥ स
र्वमेतदृतं मन्ये यन्मां वदसि
केशव ॥ नहि ते भगवन्व्यक्तिं

विदुर्देवानदानवाः ॥ ४ ॥ स्वय
मेवात्मनात्मानं वेत्थत्वं पुरु
षोत्तम ॥ भूतभावन भूतेशदे
वदेवजगत्पते ॥ ५ ॥ वक्तुमर्ह

गी
१८४

ष्यशेषेणदिव्याह्यात्मविभूत
यः॥ याभिर्विभूतिभिर्लोका
निमांस्त्वंव्याप्यतिष्ठसि॥१६॥
कथंविद्यामहंयोगिंस्त्वांसदा

दापरिचिंतयन ॥ केषुकेषुच

भावेषुचिंत्योसिभगवन्मया

॥१७॥ विस्तरेणात्मनोयोगं

विभूतिंचजनार्दन ॥ ॥ भूयः

गी
१८५

कथयंतृप्तिर्हिंशृण्वतोनास्ति
मेमृतं ॥१८॥ श्रीभगवानुवाच ॥
हंतते कथयिष्यामि दिव्याह्या
त्मविभूतयः ॥ प्राधान्यतः ।

रुश्रेष्ठनास्त्यंतोविस्तरस्य

मे ॥१९॥ अहमात्मागुडाकेश

सर्वभूताशयस्थितः ॥ अह

मादिश्चमध्यंचभूतानामंत

गी
१८८

पवच ॥ आदित्यानामहंविष्णु
र्ज्योतिषांरविरंशुमान ॥ मरी
चिर्मरुतामस्मिनक्षत्राणाम
हंशशी ॥ २१ ॥ वेदानांसामवे

दोस्मिदेवानामस्मिवासवः॥
इंद्रियाणांमनश्चास्मिभूता
नामस्मिचेतना॥२२॥रुद्राणां
शंकरश्चास्मिवित्तेशोयक्षरक्ष

गी
१८२

मो ॥ वसूनां पावकश्चास्मि मे
रुः शिखरिणामहं ॥ २३ ॥ पुरो
धसांच मुख्यं मां विद्धि पार्थ बृ
हस्पतिं ॥ सेनानीनामहं स्कंदः

सरसामस्मिसागरः॥२४॥म
हर्षीणांभृगुरहंगिरामस्म्येक
मक्षरं॥यज्ञानांजपयज्ञोस्मि
स्थावराणांहिमालयः॥२५॥

गी
१८८

श्वत्थःसर्ववृक्षाणांदेवर्षी
णांचनारदः॥गंधर्वाणांचित्र
रथःसिद्धानांकपिलोमुनिः॥ २६
उच्चैःश्रवसमश्वानांविद्धिमा

ममनोहरं ॥ येनावनेगजेंद्रा
णांनवणाणांवननायिकं ॥ २७ ॥
श्रायुधानामहंवंदेयेनुनाम
सिकामधुकृ ॥ प्रजनस्थासि

कंदर्पः सर्पाणामस्मि वासु
किः ॥२८॥ अनंतश्चास्मि नागा
नां वरुणो यादसामहं ॥ पितॄ
णामर्यमा चास्मि यमः संया

मतामहं ॥ २९ ॥ प्रह्लादश्चास्मि

दैत्यानां कालः कलयतामह

हं ॥ मृगाणां च मृगेंद्रोहं वैन

तेयश्च पक्षिणां ॥ ३० ॥ पव।

गी
१९

नः पवनामस्मि रामः शस्त्र-
भृतामहं ॥ झषाणां मकरश्चा-
स्मि स्रोतसामस्मि जाह्नवी ॥ ३१
सर्गाणामादिरंतश्च मध्यं चै-

वाहमर्जुन ॥ अध्यात्मविद्यावि

द्यानां वादः प्रवदतामहं ॥ ३२ ॥

अक्षराणामकारोस्मि द्वंद्वः ।

सामासिकस्य च ॥ अहमेवा-

गी
२१

क्षयः कालो धाताहं विश्वतो
मुखः ॥ ३३ ॥ मृत्युः सर्वह
रश्चाहमुद्भवश्च भविष्यतां ॥
कीर्तिः श्रीर्वाक्च नारीणां स्मृ

तिर्मेधाधृतिःक्षमा ॥३४॥ बृह
त्सामतथासाम्नांगायत्रीछंद
सामहं ॥ मासानांमार्गशीर्षो
हमृतूनांकुसुमाकरः ॥३५॥

गी
१२१

द्यूतंछलयतामस्मितेजस्तेज-
स्विनामहं॥जयोस्मिव्यवसा-
योस्मिसत्वंसत्ववतामहं॥३६
वृष्णीनांवासुदेवोस्मिपांडवा-

नांधनंजयः ॥ मुनीनामप्यहं
व्यासः कवीनामुशनाकविः ॥ ३७
दंडोदमयतामस्मिनीतिरस्मि
जिगीषतां ॥ मौनंचैवास्मिगु

गी
१२३

ह्यानांज्ञानंज्ञानवतामहं॥३८
यच्चापिसर्वभूतानांबीजंतद
हमर्जुन॥नतदस्तिविनाय।
स्यान्मयाभूतंचराचरं॥३९॥

नांतोस्तिममदिव्यानांविभू
तीनांपरंतप ॥ एषतूद्देशतः
प्रोक्तोविभूतेर्विस्तरोमया ॥ ४०
यद्यद्विभूतिमत्सत्वंश्रीमदूर्जि

गी
२४

तमेववा ॥ तत्तदेवावगछत्वं
ममतेजोंशसंभवं ॥ ४१ ॥ अथ
वाबहुनैतेनकिंज्ञातेनतवा-
र्जुन ॥ विष्टभ्याहमिदंकृत्स्न

मेकांशेनस्थितोजगत्॥४२॥
इतिश्रीभगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायांयोगशास्त्रेश्री।
कृष्णार्जुनसंवादेविभूतियोगो।

गी

१२५

नामदशमोध्यायः ॥१०॥ अर्जु

नउवाच॥ मद्नुग्रहायपरमं

गुह्यमध्यात्मसंज्ञितं॥ यत्वा

योक्तंवचस्तेनमोहोयंविगता

तोमम ॥१॥ भवाप्ययौहिभू

तानांश्रुतौविस्तरशोमया ॥

त्वत्तःकमलपत्राक्षमाहात्म्य

मपिचाव्ययं ॥२॥ एवमेतद्य

थात्थत्वमात्मानंपरमेश्वर ॥
द्रष्टुमिच्छामितेरूपमैश्वरंपु।
रुषोत्तम ॥३॥ मन्यसेयदित।
च्छक्यंमयाद्रष्टुमितिप्रभो ॥ ।

योगेश्वरततोमेत्वंदर्शयात्मा

नमव्ययं ॥४॥ श्रीभगवानुवाच

पश्यमेपार्थरूपाणिशतशो

थसहस्रशः ॥ नानाविधानि

दिव्यानिनानावर्णाकृतीनि
च॥५॥पश्यादित्यान्वसून्रुद्रा
नश्विनौमरुतस्तथा॥बहून्य
दृष्टपूर्वाणिपश्याश्चर्याणिभा

रत॥ ६॥ इहैकस्थंजगत्कृत्स्नं
पश्याद्यसचराचरं॥ ममदेहे
गुडाकेशयच्चान्यद्द्रष्टुमिच्छ
सि॥ ७॥ नतुमांशक्यसेद्रष्टुमा

गी
१८

नेनैवस्वचक्षुषा ॥ दिव्यंददामि
तेचक्षुः पश्यमेयोगमैश्वरं ॥
॥८॥ संजयउवाच ॥ एवमुक्त्वा
ततोराजन्महायोगेश्वरोहरिः

दर्शयामासपार्थायपरमंरू

पमैश्वरं ॥ ९ ॥ अनेकवक्त्रनय

नमनेकाद्भुतदर्शनं ॥ अनेक

दिव्याभरणंदिव्यानेकोद्यता

गी
९४

युधं ॥ १० ॥ दिव्यमाल्यांबरधरं दि
व्यगंधानुलेपनं ॥ सर्वाश्चर्यम
यं देवमनंतं विश्वतोमुखं ॥ १
१ ॥ दिविसूर्यसहस्रस्यभवे

युगपदुत्थिता ॥ यदि भाः सदृ
शी सा स्याद्भासस्तस्य महात्मा
नः ॥१२॥ तत्रैकस्थं जगत्कृत्स्नं
प्रविभक्तमनेकधा ॥ अपश्य

पश्यद्देवदेवस्यशरीरेपांडवस्त
दा॥१३॥ततःसविस्मयाविष्टो
हृष्टरोमाधनंजयः॥प्रणम्य
शिरसादेवंकृतांजलिरभा

षत॥१४॥अर्जुनउवाच॥पश्या

मिदेवांस्तवदेवदेहेसर्वांस्त

थाभूतविशेषसंघान्॥ब्रह्मा

णमीशंकमलासनस्थम्।

षींश्चसर्वानुरगांश्चदिव्यान्
॥१५॥ अनेकबाहूदरवक्त्रने
त्रंपश्यामित्वांसर्वतोनंत
रूपं॥ नांतंनमध्यंनपुनस्त

नादिंपश्यामिविश्वेश्वरविश्व
रूपं॥१६॥किरीटिनंगदिनं
चक्रिणंचतेजोराशिंसर्वतो
दीप्तिमंतं॥पश्यामित्वांदुर्नि

गी
१८२

रीक्ष्यंसमंताद्दीप्तानलार्कद्यु
तिमप्रमेयं ॥१७॥ त्वमक्षरंपर
मंवेदितव्यंत्वमस्यविश्वस्यप
रंनिधानं ॥ त्वमव्ययःशाश्वत

धर्मगोप्तासनातनस्त्वंपुरुषो

मतोमे ॥ १८ ॥ अनादिमध्यांतम

नंतवीर्यमनंतबाहुंशशि

सूर्यनेत्रं ॥ पश्यामित्वांदीप्तहु

ताशवक्त्रंस्वतेजसाविश्वमि-
दंतपंतं ॥१९॥ द्यावापृथिव्यो
रिदमंतरंहिव्याप्तंत्वयैकेनदि
शश्चसर्वाः ॥ दृष्ट्वाद्भुतंरूपमुग्रं

नवेदंलोकत्रयेप्रख्यापितंमा
हात्मन्॥२॥ प्रमीहितंवांसुया
मेव्याविपर्यंतिकेविहीनाःप्रा
नलयेयानृणांति॥ सत्नीसुबका

गी

१८४

महर्षिसिद्धसंघाः स्तुवंतित्वां

स्तुतिभिः पुष्कलाभिः ॥२१॥ रु

द्रादित्यावसवोयेचसाध्यावि

श्वेश्विनौमरुतश्चोष्मपाश्च ॥

गंधर्वयक्षासुरसिद्धसंघावीक्ष
तेत्वांविस्मिताश्चैवसर्वे ॥२२॥
रूपंमहत्तेबहुवक्त्रनेत्रंमहा-
बाहोबहुबाहूरुपादं ॥ बहू-

दंबहुदंष्ट्राकरालंदृष्ट्वालो।
काःप्रव्यथितास्तथाहं ॥२३॥
नभस्पृशंदीप्तमनेकवर्णं।
व्यात्ताननंदीप्तविशालनेत्रं॥

दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा

धृतिं न विंदामि शमं च विष्णो ॥२४

दंष्ट्राकरालानि च ते मुखानि

दृष्ट्वैव कालानलसन्निभानि ।

गी
५५

दिशोनजानेनलभेचशर्मप्र
सीददेवेशजगन्निवास॥२५॥
अमीचत्वांधृतराष्ट्रस्यपुत्राः।
सर्वेसहैवावनिपालसंघैः॥

भीर्थेद्राणाः सूतउवाच थोसो
महास्यदीर्घैरपिपेयायमुखैः ॥ ५५
वक्त्राणि नैवमाणाणि विधे।
तिरेष्ठकणालानिमयान ८।

कानि ॥ केचिद्विलग्नादशनां
तेषु संदृश्यंते चूर्णितैरुत्तमां
गैः ॥ २७ ॥ यथा नदीनां बहवों
बुवेगाः समुद्रमेवाभिमुखा द्रवं

ति ॥ तथातवामीनरलोक।
वीरा विशंतिवक्त्राण्यभिवि
ज्वलंति ॥ २८ ॥ यथाप्रदीप्तं
ज्वलनंपतंगा विशंतिनाशा

यसमुद्रवेगाः ॥ नैषेवनाशा
यविशंतिलोकास्तवापिवा
क्रामिसमुद्रवेगाः ॥ ५५ ॥ ले
लिप्यसेनुसमानःसमंतालो

कान्समग्रान्वदनैर्ज्वलद्भिः ॥
तेजोभिरापूर्यजगत्समग्रं ।
भासस्तवोग्राः प्रतपंतिवि ।
ष्णोः ॥ ३० ॥ आख्याहिमेकोभ

गी
१८

वानुग्ररूपोनमोस्तुतेदेववर।
प्रसीद॥विज्ञातुमिच्छामिभवं
तमाद्यंनहिप्रजानामितवप्र।
वृत्तिं॥३१॥श्रीभगवानुवाच॥

कालोस्मिलोकक्षयकृत्प्रवृ
द्धोलोकान्समाहर्तुमिहप्र
वृत्तः॥ ऋतेपित्वांनभविष्यं
तिसर्वेयेवस्थितांप्रत्यनीके

गी
१९

षुयोधाः ॥ ३२ ॥ तस्मात्त्वमुत्तिष्ठ

यशोलभस्व ॥ जित्वाशत्रू

न्भुंक्ष्वराज्यंसमृद्धं ॥ मयैवैते

निहताःपूर्वमेव ॥ निमित्तमा

त्रं भव सव्यसाचिन्॥३३॥ द्रोणं
च भीष्मं च जयद्रथं च कर्णं त-
थान्यानपि योधवीरान्॥ म-
या हतांस्त्वं जहि मा व्यथिष्ठा

गी

१२१

युध्यस्वजेतासिरणेसपत्ना
न्॥३४॥ संजयउवाच॥ एतच्छ्रु
त्वावचनंकेशवस्यकृतांजा
लिर्वेपमानःकिरीटी॥ नम

स्कृत्वा भूय एवाह कृष्णं सगद्ग

दं भीतभीतः प्रणम्य ॥ ३५ ॥

अर्जुन उवाच ॥ स्थाने हृषीके

श तव प्रकीर्त्या जगत्प्रहृष्य ।

गी

१९२

त्यनुरज्यतेच ॥ रक्षांसिभीता
निदिशोद्रवंति ॥ सर्वेनमस्यं
तिचसिद्धसंघाः ॥ ३६ ॥ कस्मा
च्चतेननमेरन्महात्मनगरी

यसे ब्रह्मणोऽप्यादिकर्त्रे ॥ अ
नंत देवेश जगन्निवास त्वम-
क्षरं सदसत्तत्परं यत् ॥ ३७ ॥ त्व
मादिदेवः पुरुषः पुराणस्त्वम

स्यविश्वस्यपरंनिधानं॥वेत्ता
सिवेद्यंचपरंचधामत्वयाततं-
विश्वमनंतरूप॥३८॥वायुर्य
मोग्निर्वरुणःशशांकःप्रजा

पतिस्त्वंप्रपितामहश्च ॥ नमो
नमस्तेस्तुसहस्रकृत्वः पुन-
श्चभूयोपिनमोनमस्ते ॥३९॥
नमःपुरस्तादथपृष्ठतस्तेना

गी
२४

मोस्तुतेसर्वतएवसर्व ॥ अनं
तवीर्यामितविक्रमस्त्वंसर्वं
समाप्नोषिततोसिसर्वः ॥ ४० ॥
सखेतिमत्वाप्रसभंयदुक्तं

हेकृष्णहेयादवहेसखेति॥ अ
जानतामहिमानंतवेदंमया
प्रमादात्प्रणयेनवापि॥ ४१॥
यच्चावहासार्थमसत्कृतोसि

गी
१२५

विहारशय्यासनभोजनेषु ॥
एकोथवाप्यच्युततत्समक्षं ।
तत्क्षामयेत्वामहमप्रमेयं ॥४२॥
पितासिलोकस्यचराचरस्य ।

नमस्यपूर्नस्वगुरुर्गांदीयान॥
ननम्नेमेत्यध्यपिकःकेते
मेलेकेत्रयेप्यस्तिमग्भावः
नम्मान्मगामग्रतियायका

गी

१९८

यंप्रसादयेत्वामहमीशमी

ड्यं॥पितेवपुत्रस्यसखेवस

ख्युःप्रियःप्रियायार्हसिदेव

सोढुम॥४४॥अदृष्टपूर्वंहृ

षितोस्मिदृष्ट्वाभयेनचप्रव्यथि
तंमनोमे ॥ तदेवमेदर्शयदे
वरूपं ॥ प्रसीददेवेशजग
न्निवास ॥ ४५ ॥ किरीटिनं

गी
१९

गदिनंचक्रहस्तमिच्छामित्वां
द्रष्टुमहंतथैव॥ तेनैवरूपे
णचतुर्भुजेनसहस्रबाहोभ
वविश्वमूर्ते॥४६॥ ॥श्रीभग

वानुवाच॥ मयाप्रसन्नेनतवा
र्जुनेदंरूपंपरंदर्शितमात्म
योगात्॥ तेजोमयंविश्वा
मनंतमाद्यंयन्मेत्वदन्येनन

गी
५८

दृष्टपूर्वं ॥ ४७ ॥ नवेदयज्ञाध्यय
नैर्नदानैर्नचक्रियाभिर्नतपो
भिरुग्रैः ॥ एवंरूपःशक्यअ
हंनृलोकेद्रष्टुंत्वदन्येनकुरु

प्रवीर॥४८॥ मातेव्यथामाच विमूढभावोदृष्ट्वारूपंघोर-मीदृङ्ममेदं॥व्यपेतभीः प्री-तमनाः पुनस्त्वंतदेवमेरूप

मिदं प्रपश्य ॥ ४९ ॥ संजय उवाच ॥ इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ॥ आश्वासयामास

चभीतमेनंभूत्वापुनःसौम्य
वपुर्महात्मा ॥५०॥ अर्जुनउवा
च॥ दृष्ट्वेदंमानुषंरूपंतव
सौम्यंजनार्दन ॥ इदानीं

मस्मि संवृत्तः सचेताः प्रकृ
तिं गतः ॥५१॥ श्रीभगवा
नुवाच ॥ सुदुर्दर्शमिदं रूपं
दृष्टवानसि यन्मम ॥ देवा

प्यस्यरूपस्यनित्यंदर्शन-
कांक्षिणः ॥ ५२ ॥ नाहंवेदै-
र्नतपसानदानेननचेज्य-
या ॥ शक्यएवंविधोद्रष्टुं-

गी
२१

ष्टवानसिमांयथा ॥ ५३ ॥
भक्त्यात्वनन्ययाशक्यअह
मेवंविधोर्जुन ॥ ज्ञातुंद्रष्टुं
चतत्वेनप्रवेष्टुंचपरंतप ॥

॥५४॥ मत्कर्मकृन्मत्परमो
मद्भक्तः संगवर्जितः ॥ नि
र्वैरः सर्वभूतेषु यः समा
मेति पांडव ॥५५॥ इति श्री

गी
२०२

भगवद्गीतासूपनिषत्सु।
ब्रह्मविद्यायांयोगशास्त्रेश्रीकृ
ष्णार्जुनसंवादेविश्वरूपद
र्शनंनामैकादशोध्यायः॥ ११॥

अर्जुनउवाच॥ एवंसततयुक्ता
येभक्तास्त्वांपर्युपासते॥ येचा
प्यक्षरमव्यक्तंतेषांकेयोग।
वितमाः॥१॥श्रीभगवानुवाच॥

च॥ मय्यावेश्य मनो ये मां नि-
त्ययुक्ता उपासते॥ श्रद्धया प
रयोपेतास्ते मे युक्ततमा म
ता॥२॥ ये त्वक्षरमनिर्देश्यम

व्यक्तं पर्युपासते ॥ सर्वत्रगा-
मचिंत्यं च कूटस्थमचलं ध्रु-
वं ॥ ३ ॥ संनियम्येंद्रियग्रामं
सर्वत्र समबुद्धयः ॥ ते प्राप्नुवं-

गी
२४

तिमामेवसर्वभूतहितेरताः ॥ ४
क्लेशोधिकतरस्तेषामव्यक्ता
सक्तचेतसां ॥ अव्यक्ताहिग
तिर्दुःखंदेहवद्भिरवाप्यते ॥५॥

येनसर्वाणिकर्माणिमयिसं
न्यस्यमत्पराः॥अनन्येनैवयोगे
नमांध्यायंतउपासते॥६॥
तेषामहंसमुद्धर्तामृत्युसंसा

रसागरात् ॥ भवामि नचिरात्पा
र्थ मय्यावेशितचेतसां ॥ ७ ॥ म
य्येव मन आधत्स्व मयि बुद्धिं नि
वेशय ॥ निवसिष्यसि मय्ये।

वअतऊर्ध्वंनसंशयः॥८॥अथ
चित्तंसमाधातुंनशक्नोषिमा
यिस्थिरं॥अभ्यासयोगेनत
तोमामिच्छाप्तुंधनंजय॥९॥

गी
२८

भ्यासेप्यसमर्थोसिमत्कर्म
परमोभव ॥ मदर्थमपिकर्मा
णिकुर्वन्सिद्धिमवाप्स्यसि ॥ १०
अथैतदप्यशक्तोसिकर्तुंमा

योगमाश्रितः ॥ सर्वकर्मफ

लत्यागंततःकुरुयतात्मवा

न् ॥११॥ श्रेयोहिज्ञानमभ्यासा

ज्ज्ञानाध्यानंविशिष्यते ॥ ध्याना

नात्कर्मफलत्यागस्त्यागाच्छां
तिरनंतरं ॥१२॥ अद्वेष्टासर्वभूता
नांमैत्रःकरुणएवच ॥ निर्ममो
निरहंकारः समदुःखसु

खः क्षमी ॥ १३ ॥ संतुष्टः सततं
योगी यतात्मा दृढनिश्चयः ॥ ।
मय्यर्पितमनोबुद्धिर्यो मद्भ ।
क्तः स मे प्रियः ॥ १४ ॥ यस्मान्नो

गी
२०८

द्विजते लोको लोकान्नोद्विजते
च यः ॥ हर्षामर्षभयोद्वेगैर्मुक्तो
यः स च मे प्रियः ॥ १५ ॥ अनपेक्षः
शुचिर्दक्ष उदासीनो गतव्यथः

सर्वारंभपरित्यागीयोमद्भक्तः

समेप्रियः ॥१६॥ योनहृष्यति।

नद्वेष्टिनशोचतिनकांक्षति॥

शुभाशुभपरित्यागीभक्तिमा।

गी
२०९

नः समेप्रियः ॥ १७ ॥ समः शत्रौ
च मित्रे च तथा मानापमानयोः
शीतोष्ण सुखदुःखेषु समः सं
गविवर्जितः ॥ १८ ॥ तुल्यनिंदास्तु

तिर्मौनीसंतुष्टोयेनकेनचित॥
अनिकेतंस्थिरमतिर्भक्तिमा।
न्मेप्रियोनरः॥१९॥येतुधर्मामृ
तमिदंयथोक्तंपर्युपासते॥श्र

द्दधानामत्परमाभक्तास्तेतीव
मेप्रियाः॥२०॥इतिश्रीभगवद्गीता
सूपनिषत्सुब्रह्मविद्यायांयोगशा-
स्त्रेश्रीकृष्णार्जुनसंवादेभक्तियो

गोनामद्वादशोध्यायः॥१२॥अर्जुन

उवाच॥ प्रकृतिंपुरुषंचैवक्षेत्रं

क्षेत्रज्ञमेवच॥ एतद्वेदितुमि

च्छामिज्ञानंज्ञेयंचकेशव॥१॥

गी
२११

श्रीभगवानुवाच ॥ इदंशरीरंकौं
तेयक्षेत्रमित्यभिधीयते ॥ एत
द्योवेत्तितंप्राहुः क्षेत्रज्ञइति
तद्विदः ॥ १ ॥ क्षेत्रज्ञंचापिमांविद्धि

सर्वेत्तेषुभावन ॥ तेइतेइत
येन्मेनंयक्ष्मानंमनंमम ॥ व
ननेइंयब्रयाहक्षयहिकावि
यतस्थयन ॥ सर्वयोयनसभाव

श्चतत्समासेन मे शृणु ॥ ४ ॥ ऋ
षिभिर्बहुधा गीतं छंदोभिर्विवि
धैः पृथक् ॥ ब्रह्मसूत्रपदैश्चै
व हेतुमद्भिर्विनिश्चितैः ॥ ५ ॥

महाभूतान्यहंकारोबुद्धिरव्यक्त
मेवच ॥ इंद्रियाणिदशैकंचपं
चेंद्रियगोचराः ॥ ५ ॥ इच्छाद्वे
षः सुखंदुःखंसंघातश्चेतना ।

धृतिः ॥ एतत्क्षेत्रंसमासेनस-
विकारमुदाहृतं ॥ ७ ॥ अमानि-
त्वमदंभित्वमहिंसाक्षांतिरा-
र्जवं ॥ आचार्योपासनंशौचं-

स्थैर्यमात्मविनिग्रहः ॥७॥ इंद्रि
यार्थेषुवैराग्यमनहंकारएव
च ॥ जन्ममृत्युजराव्याधिदुःख
दोषानुदर्शनं ॥८॥ असक्तिरन-

गी
२१४

भिष्वंगःपुत्रदारगृहादिषु॥नि
त्यंचसमचित्तत्वमिष्टानिष्टोप-
पत्तिषु॥९॥मयिचानन्ययोगे
नभक्तिरव्यभिचारिणी॥विवि

क्तदेशसेवित्वमरतिर्जनसंस
दि॥११॥अध्यात्मज्ञाननित्यत्वंत
त्वज्ञानार्थदर्शनं॥एतज्ज्ञानमि
तिप्रोक्तमज्ञानंयदतोन्यथा॥१

गी
२५

नैवयज्ञस्त्वबद्याभियज्ञानानाम
नमस्कृते ॥ यनादिमस्यंवद्यः।
नमन्नामसङ्ख्याते ॥ ५ ॥ सर्वेनः
पापिपापांतनसर्वेतो विशिवो।

मुखं ॥ सर्वतः श्रुतिमल्लोके
सर्वमावृत्य तिष्ठति ॥ १३ ॥ सर्वे
न्द्रियगुणाभासं सर्वेन्द्रियविव-
र्जितं ॥ असक्तं सर्वभृच्चैव निर्गु

णंगुणभोक्तृच ॥ १४ ॥ बहिरंतश्च
भूतानामचरंचरमेवच ॥ सूक्ष्म
त्वात्तदविज्ञेयंदूरस्थंचांतिके।
चतत् ॥ १५ ॥ अविभक्तंचभूतेषु

विभक्तमिवचस्थितं ॥ भूतभर्तृ

चतज्ज्ञेयंग्रसिष्णुप्रभविष्णुच ॥ १६

ज्योतिषामपितज्ज्योतिस्तमसः

परमुच्यते ॥ ज्ञानंज्ञेयंज्ञानग

मे हृदि सर्वस्य विष्ठितं ॥ १७ ॥ इ
ति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं स
मासतः ॥ मद्भक्त एतद्विज्ञाय
मद्भावायोपपद्यते ॥ १८ ॥ प्रकृ

तिंपुरुषंचैवविद्ध्यनादीउभा-
वपि॥ विकारांश्चगुणांश्चैववि
द्धिप्रकृतिसंभवान्॥२०॥कार्य-
कारणकर्तृत्वेहेतुःप्रकृतिरु

गी
२१८

च्यते ॥ पुरुषःसुखदुःखानां
भोक्तृत्वेहेतुरुच्यते ॥ २० ॥ पुरुषः
प्रकृतिस्थोहिभुंक्तेप्रकृतिजा
न्गुणान् ॥ कारणंगुणसंगो

स्यसदसद्योनिजन्मसु ॥ उपद्र
ष्टानुमंताचभर्ताभोक्तामहेश्व
रः ॥ परमात्मेतिचाप्युक्तोदेहे
स्मिन्पुरुषःपरः ॥ २२ ॥ यएवंवे

त्तिपुरुषंप्रकृतिंचगुणैःसह
सर्वथावर्तमानोपिनसभू
योभिजायते ॥ २४ ॥ ध्यानेनात्म
निपश्यंतिकेचिदात्मानमा

त्मना ॥ अन्ये सांख्येन योगेन ।
कर्मयोगेन चापरे ॥ २४ ॥ अन्ये
त्वेवमजानंतः श्रुत्वान्येभ्य उपा
सते ॥ तेपि चातितरंत्येव मृत्युं

श्रुतिपरायणाः॥२६॥ यावत्सं
जायतेकिंचित्सत्वंस्थावरजंग
म॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्वि
द्धिभरतर्षभ॥२७॥ समंसर्वेषु

भूतेषुतिष्ठंतंपरमेश्वरं॥विन

श्यत्स्वविनश्यंतंयःपश्यतिस

पश्यति॥२८॥समंपश्यन्हि

सर्वत्रसमवस्थितमीश्वरं॥न

गी
२२१

हिनस्त्यात्मनात्मानंततोयाति
परांगतिं ॥ २९ ॥ प्रकृत्यैवचकर्मा
णिक्रियमाणानिसर्वशः ॥ यः
पश्यतितथात्मानमकर्तारंस

पश्यति ॥ ३० ॥ यदाभूतपृथग्भा
वमेकस्थमनुपश्यति ॥ ततए
वचविस्तारंब्रह्मसंपद्यतेतदा
अनादित्वान्निर्गुणत्वात्परमा-

३१

गी
२२२

त्मायमव्ययः ॥ शरीरस्थोपि ।
कौंतेयनकरोतिनलिप्यते ॥ ३
यथासर्वगतंसौक्ष्म्यादाकाशं
नोपलिप्यते ॥ सर्वत्रावस्थितो

देहे तथात्मा नोपलिप्यते ॥ ३२ ॥

यथा प्रकाशयत्येकः कृत्स्नं लो

कमिमं रविः ॥ क्षेत्रं क्षेत्री तथा

कृत्स्नं प्रकाशयति भारत ॥ ३३

गी

२२२

क्षेत्रक्षेत्रज्ञयोरेवमंतरंज्ञानच
क्षुषा ॥ भूतप्रकृतिमोक्षंचये
विदुर्यांतितेपरं ॥ ३५ ॥ इतिश्रीभ
गवद्गीतासूपनिषत्सु ब्रह्मवि

द्यायां योगशास्त्रे श्रीकृष्णार्जु

नसंवादे क्षेत्रक्षेत्रज्ञनिर्देशयोगो

नाम त्रयोदशोऽध्यायः ॥१३॥ श्री

भगवानुवाच ॥ परं भूयः प्रवक्ष्या

मिज्ञानानांज्ञानमुत्तमं॥यज्ज्ञा
त्वामुनयःसर्वेपरांसिद्धिमितो
गताः॥१॥इदंज्ञानमुपाश्रित्यम·
मसाधर्म्यमागताः॥सर्गेपि

नोपजायंतेप्रलयेनव्यथंतिच
॥ २ ॥ ममयोनिर्महद्ब्रह्मतस्मि
न्गर्भंदधाम्यहं ॥ संभवःसर्वभू
तानांततोभवतिभारत ॥ ३ ॥

गी
२५

सर्वयोनिषुकौंतेयमूर्तयःसं
भवंतियाः॥तासांब्रह्ममहद्यो
निरहंबीजप्रदःपिता॥४॥सत्वं
रजस्तमइतिगुणाःप्रकृतिसं

भवाः॥ निबध्नंतिमहाबाहोदे-
हेदेहिनमव्ययं॥५॥तत्रसत्वंनि
र्मलत्वात्प्रकाशकमनामयं।
सुखसंगेनबध्नातिज्ञानसं-

गी
११८

गेन चानघ ॥ ६॥ रजो रागात्म
कं विद्धि तृष्णासंगसमुद्भवं ॥ त
न्निबध्नाति कौंतेय कर्मसंगेन
देहिनं ॥ ७॥ तमस्त्वज्ञानजं विद्धि

मोहनंसर्वदेहिनो ॥ प्रमादा

लस्यनिद्राभिस्तन्निबध्नातिभा

रत ॥८॥ सत्वंसुखेसंजयतिरजः

कर्मणिभारत ॥ ज्ञानमावृत्य

गी
२२

त्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥
रजस्तमश्चाभिभूयः ॥ सत्वंभव
ति भारत ॥ रजः सत्वं तमश्चैव
तमः सत्वं रजस्तथा ॥ १० ॥ सर्वद्वा

रेषुदेहेस्मिन्प्रकाशउपजाय

ते ॥ ज्ञानंयदातदाविद्याद्विवृ

द्धंसत्वमित्युत ॥ ११ ॥ लोभःप्रवृ

त्तिरारंभः कर्मणामशमःस्पृहा

गी
२२८

रजस्येतानिजायंतेविवृद्धेभरत
र्षभ ॥ २ ॥ अप्रकाशोप्रवृत्तिश्च
प्रमादोमोहएवच ॥ तमस्येता
निजायंतेविवृद्धेकुरुनंदन ॥ १३

यदासत्वेप्रवृद्धेतुप्रलयंयाति
देहभृत् ॥ तदोत्तमविदांलो
कानमलान्प्रतिपद्यते ॥ १४ ॥ र
जसिप्रलयंगत्वाकर्मसंगिषु

गी
२२९

जायते॥ तथाप्रलीनस्तमसि-
मूढयोनिषुजायते॥१५॥ कर्म
णः सुकृतस्याहुः सात्विकंनिर्म
लंफलं॥ रजसस्तुफलंदुःख-

मज्ञानंतमसःफलं ॥१६॥ स
त्त्वात्संजायतेज्ञानंरजसोलो
भएवच ॥ प्रमादमोहौतमसो
भवतोज्ञानमेवच ॥१७॥ ऊर्ध्वंग

गी

२२

च्छंति सत्वस्था मध्ये तिष्टंति रा
जसाः ॥ जघन्यगुणावृत्तिस्था
अधो गच्छंति तामसाः ॥ ८ ॥ नान्यं
गुणेभ्यः कर्तारं यदा द्रष्टानुप

श्यति ॥ गुणेभ्यश्च परं वेत्ति म
द्भावं सोधिगच्छति ॥ १९ ॥ गुणा
नेतानतीत्य त्रीन्देही देहसमु
द्भवान् ॥ जन्ममृत्युजरादुःखैर्वि

मुक्तोमृतमश्नुते ॥२०॥ अर्जुन उ
वाच ॥ कैर्लिंगैस्त्रीन्गुणानेता
नतीतो भवति प्रभो ॥ किमाचा
रः कथं चैतांस्त्रीन्गुणानतिव

र्तते ॥२१॥ श्रीभगवानुवाच ॥ प्र

काशंचप्रवृत्तिंचमोहमेवच-

पांडव ॥ नद्वेष्टिसंप्रवृत्तानिन

निवृत्तानिकांक्षति ॥२२॥ उदा

गी
२३

सीनवदासीनोगुणैर्योनवि-
चाल्यते ॥ गुणावर्तंतेन इत्येवयो
वतिष्ठतिनेंगते ॥ २३ ॥ समदुः
खसुखस्वस्थःसमलोष्ठाश्मा

कांचनः॥ तुल्यप्रियाप्रियोधी

रस्तुल्यनिंदात्मसंस्तुतिः॥२४॥

मानापमानयोस्तुल्यस्तुल्यो

मित्रारिपक्षयोः॥ सर्वारंभपरि

गी

२२२

त्यागी गुणातीतः स उच्यते ॥ २५

मां च यो व्यभिचारेण भक्तियो-

गेन सेवते ॥ स गुणान्समती-

त्यैतान्ब्रह्मभूयाय कल्पते ॥ २६

ब्रह्मणोहिप्रतिष्ठाहममृतस्या
व्ययस्यच॥ शाश्वतस्यचधर्मस्य
सुखस्यैकांतिकस्यच॥२७॥ ३।
तिश्रीभगवद्गीतासूपनिषत्सुब्र

गी·
२५४

ह्मविद्यायांयोगशास्त्रेश्रीकृष्णा
र्जुनसंवादेगुणत्रयविभागयो
गोनामचतुर्दशोध्यायः॥१४॥श्री
भगवानुवाच॥ऊर्ध्वमूलमधः

शाखमश्वत्थंप्राहुरव्ययं॥छं
दांसियस्यपर्णानियस्तंवेदस
वेदवित्॥१॥अधश्चोर्ध्वंप्रसृता
स्तस्यशाखागुणप्रवृद्धाविष-

गी
२२५

यप्रबालाः ॥ अधश्चमूलान्यनु
संतनानि कर्मानुबंधीनि मनु
ष्यलोके ॥ २ ॥ न रूपमस्येह तथो
पलभ्यते नांतो न चादिर्न च सं

प्रतिष्ठा ॥ अश्वत्थमेनंसुविरू
ढमूलमसंगशस्त्रेणदृढेन ।
छित्वा ॥ ३ ॥ ततःपदंतत्परिमा
र्गितव्यंयस्मिन्गतानानिवर्तं ।

गी

२८

न्तिभूयः॥ तमेवचाद्यंपुरुषंप्रप

द्येयतः प्रवृत्तिः प्रसृतापुराणी

॥४॥ निर्मानमोहाजितसं

गदोषाअध्यात्मनित्याविनिवृ

त्तकामाः ॥ द्वंद्वैर्विमुक्ताः सुख
दुःखसंज्ञैर्गच्छंत्यमूढाः पदम
व्ययंतत् ॥ ५ ॥ नतद्भासयते सू
र्योनशशांकोनपावकः ॥ य

गी

त्वा न निवर्तंते तद्धाम परमंम
म ॥६॥ ममैवांशो जीवलोके।
जीवभूतः सनातनः ॥ मनःष
ष्ठानींद्रियाणि प्रकृतिस्थानि

कर्षति ॥ ७ ॥ शरीरं यदवाप्नोति
यच्चाप्युत्क्रामतीश्वरः ॥ गृही
त्वैतानि संयाति वायुर्गंधानि
वाशयात् ॥ ८ ॥ श्रोत्रं चक्षुः स्पर्श

गी
१२८

नंचरसनंघ्राणमेवच ॥ अधिष्ठा
यमनश्चायंविषयानुपसेवते
॥९॥ उत्क्रामंतंस्थितंवापिभुं
जानंवागुणान्वितं ॥ विमूढाना

नुपश्यंतिपश्यंतिज्ञानचक्षु-
षः॥१०॥ यतंतोयोगिनश्चैनंप-
श्यंत्यात्मन्यवस्थितं॥ यतंतोप्य-
कृतात्मानोनैनंपश्यंत्यचेतसः॥

गी
२२९

यदादित्यगतंतेजोजगद्भास
यतेखिलं ॥ यच्चंद्रमसियच्चा
ग्नौतत्तेजोविद्धिमामकं ॥१२॥
गामाविश्यचभूतानिधारयाम्यहमो

जसा ॥ पुष्णामि चौषधीः सर्वाः
सोमो भूत्वा रसात्मकः ॥१३॥ अ
हं वैश्वानरो भूत्वा प्राणिनां देह
माश्रितः ॥ प्राणापानसमायुक्तः

पचाम्यन्नंचतुर्विधं ॥१४॥ सर्वस्य
चाहंहृदिसंनिविष्टोमत्तःस्मृति
र्ज्ञानमपोहनंच॥ वेदैश्चसर्वैरह
मेववेद्योवेदांतकृद्वेद ।

विदेवचाहं ॥ १५ ॥ द्वाविमौपुरुषौ

लोकेक्षरश्चाक्षरएवच ॥ क्षरःसर्वा

णिभूतानिकूटस्थोक्षरउच्यते ॥ १६

उत्तमःपुरुषस्त्वन्यःपरमात्मे

स्तुदाहृतः॥ योलोकत्रयमा
विश्यबिभर्त्यव्ययईश्वरः॥१७॥
यस्मात्क्षरमतीतोहमक्षरादा
पिचोत्तमः॥ अतोस्मिलोकेवेदेचप्र

थितः पुरुषोत्तमः ॥ १८ ॥ यो मामे
वमसंमूढो जानाति पुरुषोत्त
मं ॥ स सर्वविद्भजति मां सर्वभा
वेन भारत ॥ इति गुह्यतमं शास्त्र

गी

२५२

मिदमुक्तं मयानघ ॥ एतद्बुद्ध्वा बुद्धि

मान्स्यात्कृतकृत्यश्च भारत ॥ २० ॥

इति श्रीभगवद्गीतासूपनिषत्सु ब्र

ह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जु

नसंवादेपुरुषोत्तमयोगोनाम

पंचदशोध्यायः ॥१५॥ श्रीभगवानुवा

च ॥ अभयंसत्वसंशुद्धिर्ज्ञानयो

गव्यवस्थितिः ॥ दानंदमश्चयज्ञश्च

गी
२५१

स्वाध्यायस्तपआर्ज्जवं ॥१॥ अहिं
सासत्यमक्रोधस्त्यागः शांति
रपैशुनं ॥ दयाभूतेष्वलोलत्वमा
र्दवंह्रीरचापलं ॥२॥ तेजःक्षमाधृ

तिःशौचमद्रोहोनातिमानिता
भवंतिसंपदंदैवीमभिजातस्य
भारत ॥ ३ ॥ दंभोदर्पोभिमानश्च
क्रोधःपारुष्यमेवच ॥ अज्ञानंचा

भिजातस्यपार्थसंपदमासुरीं॥ ४
दैवीसंपद्विमोक्षायनिबंधाया
सुरीमता॥ माशुचःसंपदंदै
वीमभिजातोसिपांडव॥ ५॥

द्वौभूतसर्गौलोकेस्मिन्दैव
आसुरएवच ॥ दैवोविस्तरशः
प्रोक्तआसुरंपार्थमेशृणु ॥ ६ ॥
प्रवृतिंचनिवृतिंचजनानवि

गी
२५२

ड्रामगः ॥ नश्रोचेनापिचा-
चारेनसंतेषुविधते ॥ ५ ॥ ब्रम
समपितंतेजनगादाऊरनी-
स्वां ॥ घणासासंभ्रतेकिमा-

मनकामहैनके ॥८॥ पनेहीष

मवषभयनषामानोलतुड।

यः ॥ धमवेनुग्रकर्मीणाःवा

यायजनानोहिनां ॥९॥ कामम

श्रित्यदुःपूरंदंभमानमदान्वि
ताः॥ मोहाद्गृहीत्वासद्ग्राहान्प्र
वर्त्तंतेशुचिव्रताः॥१०॥ चिंताम
परिमेयांचप्रलयांतामुपा।

श्रिताः ॥ कामोपभोगपरमा
एतावदिति निश्चिताः ॥ ११ ॥ आ
शापाशशतैर्बद्धाः कामक्रोध
परायणाः ॥ ईहन्ते कामभो

गी

२४

गार्थमन्यायेनार्थसंचयान ॥ १२
इदमद्यमयालब्धमिमंप्राप्स्ये
मनोरथं ॥ इदमस्तीदमपिमे
भविष्यतिपुनर्धनं ॥ १३ ॥ असौम

याहतःशत्रुर्हनिष्येचापराना-
पि॥ ईश्वरोहमहंभोगीसिद्धो-
हंबलवान्सुखी॥ १४ ॥आढ्यो-
भिजनवानस्मिकोन्योस्तिस-

गी
२५८

दृशो मया ॥ यक्ष्ये दास्यामि मो
दिष्य इत्यज्ञानविमोहिताः ॥१५
अनेकचित्तविभ्रांता मोहजा
लसमावृताः ॥ प्रसक्ताः काम

भोगेषु पतंति नरकेऽशुचौ ॥१६

आत्मसंभाविताः स्तब्धा धनमा

नमदान्विताः ॥ यजंते नामय-

ज्ञैस्ते दंभेनाविधिपूर्वकं ॥१७

गी

२५४

अहंकारंबलंदर्पंकामंक्रोधं

चसंश्रिताः ॥ मामात्मपरदेहे

षुप्रद्विषंतोभ्यसूयकाः ॥१८॥

तानहंद्विषतःक्रूरान्संसारेष

नराधमान् ॥ क्षिपाम्यजस्रम
शुभानासुरीष्वेवयोनिषु ॥ १९ ॥
आसुरींयोनिमापन्नामूढा।
जन्मनिंजन्मनि ॥ मामप्राप्यै

गी

२५

वकौंतेयततोयांत्यधमांगतिं
॥२०॥त्रिविधंनरकस्येदंद्वारं
नाशनमात्मनः॥कामःक्रो
धस्तथालोभस्तस्मादेतत्त्रयं

त्यजेत् ॥ २१ ॥ एतैर्विमुक्तः कौं
तेय तमोद्वारैस्त्रिभिर्नरः ॥ आ
चरत्यात्मनः श्रेयस्ततो याति
परां गतिं ॥ २२ ॥ यः शास्त्रविधि-

गी
२५१

मुत्सृज्यवर्ततेकामकारतः॥
नससिद्धिमवाप्नोतिनसुखंन
परांगतिं॥२३॥तस्माच्छास्त्रंप्र
माणंतेकार्याकार्यव्यवस्थितौ

ज्ञात्वाशास्त्रविधानोक्तंकर्म।

कर्त्तुमिहार्हसि॥२४॥ इतिश्री

भगवद्गीतासूपनिषत्सुब्रह्मवि

द्यायांयोगशास्त्रेश्रीकृष्णार्जु।

नसंवादे दैवासुरसंपद्विभागयोगो
नाम षोडशोध्यायः ॥१६॥ अर्जुन
उवाच ॥ ये शास्त्रविधिमुत्सृज्य
यजंते श्रद्धयान्विताः ॥ तेषांनि

ष्ठातुकाकृष्णसत्वमाहोरजस्त

मः ॥१॥ श्रीभगवानुवाच ॥ त्रि

विधाभवतिश्रद्धादेहिनांसा

स्वभावजा ॥ सात्विकीराजसी

गी
२५२

चैवतामसीचेतितांशृणु ॥२॥
सत्वानुरूपासर्वस्यश्रद्धाभवा-
तिभारत ॥ श्रद्धामयोयंपुरुषो-
योयच्छ्रद्धःसएवसः ॥३॥४॥

यजंतेसात्विकादेवान्यक्ष
रक्षांसिराजसाः॥ प्रेतान्भू
तगणांश्चान्येयजंतेता
मसाजनाः॥४॥अशास्त्र

गी
२५४

विहितंघोरंतप्यंतेयेतपो
जनाः ॥ दंभाहंकारसंयु
क्ताः ॥ कामरागबलान्वि
ताः ॥ ५ ॥ कर्षयंतःशरीर

स्थंभूतग्राममचेतसः॥ मां
चैवांतःशरीरस्थंतान्विद्ध्यासु
रनिश्चयान्॥६॥आहारस्त्व
पिसर्वस्यत्रिविधोभवतिप्रि

यः॥ यज्ञस्तपस्तथा दानं तेषां
भेदमिमं शृणु॥ ७॥ आयुःसत्व
बलारोग्यसुखप्रीतिविवर्द्धा
नाः॥ रस्याः स्निग्धाः स्थिरा हृ

द्या आहाराः सात्विकप्रियाः ॥८

कट्वम्ललवणात्युष्णतीक्ष्ण

रुक्षविदाहिनः ॥ आहारा राज

सस्येष्टा दुःखशोकामयप्रदाः ॥९

गी

२५५

यः ॥ यज्ञस्तपस्तथा दानं तेषां

भेदमिमं शृणु ॥ ७ ॥ आयुःसत्व

बलारोग्यसुखप्रीतिविवर्द्धा

नाः ॥ रस्याः स्निग्धाः स्थिरा हृद्या

द्याआहाराःसात्विकप्रियाः॥८

कट्वम्ललवणात्युष्णतीक्ष्णा

रूक्षविदाहिनः॥आहाराराज

सस्येष्टाःदुःखशोकामयप्रदाः॥९

गी
२५८

यातयामंगतरसंपूतिपर्यु
षितंचयत्॥उच्छिष्टमपिचामे
ध्यंभोजनंतामसप्रियं॥१०॥अ
फलाकांक्षिभिर्यज्ञोविधिदृ

ष्टोयइज्यते॥ यष्टव्यमेवेति

मनःसमाधायससात्विकः॥ ॥ ११ ॥

अभिसंधायतुफलंदंभार्थम

पिचैवयत्॥ इज्यतेभरतश्रेष्ठ

गी

२५२

तंयज्ञंविद्धिराजसं॥१२॥विधि

हीनमसृष्टान्नंमंत्रहीनमद

क्षिणं॥श्रद्धाविरहितंयज्ञंता

मसंपरिचक्षते॥१३॥देवद्विज

गुरुप्राज्ञपूजनंशौचमार्जवं ॥
ब्रह्मचर्यमहिंसाचशारीरंत
पउच्यते ॥ अनुद्वेगकरंवाक्यं
सत्यंप्रियहितंचयत् ॥ स्वाध्या

याभ्यसनं चैव वाङ्मयं तप उ
च्यते ॥ १५ ॥ मनःप्रसादः सौम्य
त्वं मौनमात्मविनिग्रहः ॥ भा
वसंशुद्धिरित्येतत्तपो मानसमु

मुच्यते ॥ ८ ॥ अष्टणापापयातनं

नपलत्रिवियंनैः ॥ अफला

कांहिभिर्धकैःसाविकंपारा

वहते ॥ ९ ॥ सकारामानष्टना

ध्येनपादेभनेवेवयन ॥ क्रिया
तेनदिदृपोकेराजसंवलमधु
वे ॥ मृत्युग्राहेणाम्नेनायमी
इयाक्रियतेनपः ॥ पारैस्या॰

त्सादनार्थं वा तत्तामसमुदा
हृतं ॥१९॥ दातव्यमिति यद्दा
नं दीयतेनुपकारिणे ॥ देशे
काले च पात्रे च तद्दानं सात्वि

गी

२८

कंस्मृतं ॥ २० ॥ यत्तुप्रत्युपकारा

र्थंफलमुद्दिश्यवापुनः ॥ ४ ॥

दीयतेचपरिक्लिष्टंतद्दानंराजस-

स्मृतं ॥ २१ ॥ अदेशकालेयदा

दानमपात्रेभ्यश्चदीयते॥ अस

त्कृतमवज्ञातंतत्तामसमुदा

हृतं॥२२॥ ॐतत्सदितिनिर्देशो

ब्रह्मणस्त्रिविधः स्मृतः॥ ब्राह्म

गी
५८

णास्तेनवेदाश्चयज्ञाश्चविहिता
ःपुरा ॥ २३ ॥ तस्मादोमित्यु
दाहृत्ययज्ञदानतपःक्रियाः ॥
प्रवर्तन्तेविधानोक्ताःसततंब्र

ह्मवादिनो ॥ २४ ॥ तदित्यन
भिसंधायफलंयज्ञतपःक्रि
याः ॥ दानक्रियाश्चविविधाः ।
क्रियंतेमोक्षकांक्षिभिः ॥ २५ ॥

सद्भावेसाधुभावेचसदित्येत
त्प्रयुज्यते॥प्रशस्तेकर्मणित
थासच्छब्दःपार्थयुज्यते॥२६॥
यज्ञेतपसिदानेचस्थितिःसदि

निबोधयते ॥ कर्मैव न दृष्टौ ।
ये स्मदिस्मे काभिधीयते ॥ २५ ॥
खण्डयाद्यंते दंतेन पलभे कु
ने चयत ॥ खमदिस्थ्यते पार्थ

गी
२८३

नचतत्प्रेत्यनोइह ॥२८॥ इति
श्रीभगवद्गीतासूपनिषत्सुब्रह्म
विद्यायांयोगशास्त्रेश्रीकृष्णा
र्जुनसंवादेत्रिगुणविभागयोगो

नाम सप्तदशोऽध्यायः ॥ १७ ॥ अ

र्जुन उवाच ॥ संन्यासस्य महाबा

हो तत्त्वमिच्छामि वेदितुं ॥ त्या

गस्य च हृषीकेश पृथक्केशि

निसूदन ॥१॥ श्रीभगवानुवाच ॥
काम्यानांकर्मणांन्यासंसंन्या
संकवयोविदुः ॥ सर्वकर्मफ
लत्यागंप्राहुस्त्यागंविचक्षणाः ॥२

त्याज्यंदोषवदित्येकेकर्मप्रा
हुर्मनीषिणः॥ यज्ञदानतपः
कर्मनत्याज्यमितिचापरे॥३॥
निश्चयंशृणुमेतत्रभरतसत्त

त्तम ॥ त्यागो हि पुरुषव्याघ्र त्रि
विधः संप्रकीर्तितः ॥ ४ ॥ यज्ञ
दानतपः कर्म न त्याज्यं कार्यमे
व तत् ॥ यज्ञो दानं तपश्चैव पाव

नानिमनीषिणां ॥ ५ ॥ एतान्य

पितुकर्माणिसंगंत्यक्त्वाफ-

लानिच ॥ कर्तव्यानीतिमेपार्थ

निश्चितंमतमुत्तमं ॥ ६ ॥ नियतस्य

गी
१८८

तु संन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः
परिकीर्तितः॥७॥ दुःखमित्ये
व यत्कर्म कायक्लेशभयात्त्य।

नेत ॥ सकृन्नाराजसेनायांते
वनांगफलंलभेत ॥ ७ ॥ कार्यो
मिसेवयकर्मेनियवंक्रियते
नेन ॥ संवांसकाफलंवेवमा

स्त्यागः सात्विको मतः॥९॥ नद्वे
ष्ट्यकुशलं कर्म कुशले नानुष
ज्जते॥ त्यागी सत्वसमाविष्टो मे
धावी छिन्नसंशयः॥१०॥ नहि दे

हभृताशक्यंत्यक्तुंकर्माण्य

शेषतः॥ यस्तुकर्मफलत्यागी

सत्यागीत्यभिधीयते॥ ११॥ अनि

ष्टमिष्टंमिश्रंचत्रिविधंकर्मणः

गी
२५८

फलं ॥ भवत्यत्यागिनांप्रेत्य
नतुसंन्यासिनांक्वचित ॥ पं
चैतानिमहाबाहोकारणा।
निनिबोधमे ॥ सांख्येकृतांते

प्रोक्तानि सिद्धये सर्वकर्मणां। १३
अधिष्ठानं तथा कर्ता करणं च
पृथग्विधं॥ विविधाश्च पृथक्चे
ष्टा दैवं चैवात्र पंचमं॥ १४॥ पा

रीरवाङ्मनोभिर्यत्कर्मप्रारभ
तेनरः॥ न्याय्यंवाविपरीतंवा
पंचैतेतस्यहेतवः॥१५॥तत्रैवं
सतिकर्तारमात्मानंकेवलं

न्वयः ॥ प्रपन्नकृतवुद्धिना ।
त्रमप्रपत्तिउर्मतिः ॥ ९ ॥ य
स्यनाहंकृतोभावोवुद्धिर्य ।
स्यनलिप्यते ॥ हत्वापिस३ ।

गी
१८

मांल्लोकान्नहन्ति न निबध्य-
ते ॥ १७ ॥ ज्ञानंज्ञेयंपरिज्ञाता ।
त्रिविधा कर्मचोदना ॥ कारणं ।
कर्मकर्तेति त्रिविधः कर्मसंग्र-

हः॥१८॥ ज्ञानंकर्मचकर्ताच
त्रिधैवगुणभेदतः॥ प्रोच्यतेगु
णसंख्यानेयथावच्छृणुता
न्यपि॥१९॥ सर्वभूतेषुयेनै

गी
२१

केभावमव्ययमीक्षते ॥ अवि
भक्तंविभक्तेषुतज्ज्ञानंविद्धि
सात्विकं ॥ २० ॥ पृथक्त्वेनतुय
ज्ज्ञानंनानाभावान्पृथग्विधा

न् ॥ वेत्तिसर्वेषुभूतेषुतज्ज्ञानं

विद्धिराजसं ॥ २१ ॥ यत्तुकृत्स्न

वदेकस्मिन्कार्येसक्तमहैतु

कं ॥ अतत्त्वार्थवदल्पंचतत्ता

गी

२२१

मसमुदाहृतं ॥२२॥ नियतंसं
गरहितमरागद्वेषतःकृतं ॥
अफलप्रेप्सुनाकर्मयत्तत्सा-
त्विकमुच्यते ॥२३॥ यत्तुकामे

प्सुनाकर्मसाहंकारेणवा
पुनः॥ क्रियतेबहुलायासं
तद्राजसमुदाहृतं॥२४॥अ
नुबंधंक्षयंहिंसामनवेक्ष्यच

गी
२३

पौरुषं ॥ मोहादारभ्यते कर्म
यत्तत्तामसमुच्यते ॥ २५ ॥ मुक्त
संगोनहंवादीधृत्युत्साहस
मन्वितः ॥ सिद्ध्यसिद्ध्योर्निर्वि

कार्यः कर्ता सात्विक उच्यते ॥ २६

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसा।

त्मकोऽशुचिः ॥ हर्षशोका

न्वितः कर्ता राजसः परिकी।

तितः॥२७॥अयुक्तःप्राकृत
स्तब्धःशठोनैष्कृतिकोलसः॥
विषादीदीर्घसूत्रीचकर्ताता
मसउच्यते॥२८॥बुद्धेर्भेदंधृते

श्चैवगुणतस्त्रिविधंशृणु ॥ प्रो
च्यमानमशेषेणपृथक्त्वेनध
नंजय ॥ २९ ॥ प्रवृत्तिंचनिवृ
त्तिंचकार्याकार्येभयाभये ॥

गी
२५५

वंधंमोक्षंचयावेत्तिबुद्धिःसा
पार्थसात्विकी॥३०॥ययाधर्म
मधर्मंचकार्यंचाकार्यमेवच॥
अयथावत्प्रजानातिबुद्धिःसा

पार्थराजसी ॥ ३१ ॥ अधर्मंध
र्ममिति या मन्यते तमसावृ
ताः ॥ सर्वार्थान्विपरीतांश्च बु
द्धिः सा पार्थ तामसी ॥ ३२ ॥

धृत्यायया धारयते मनः प्राणें
द्रियक्रियाः ॥ योगेनाव्यभि
चारिण्या धृतिः सा पार्थ सा
त्विकी ॥ ३३ ॥ यया तु धर्मा

कामार्थान्धृत्याधारयतेर्जु

न ॥ प्रसंगेनफलाकांक्षीधृ

तिःसापार्थराजसी ॥ ३४ ॥ य

यास्वप्नंभयंशोकंविषादंमा

दमेवच ॥ नविमुंचतिदुर्मेधा
धृतिःसापार्थतामसी ॥ ३५ ॥
सुखंत्विदानींत्रिविधंशृणुमे
भरतर्षभ ॥ अभ्यासाद्रमतेय

त्र दुःखांतं च निगच्छति ॥ ३६ ॥

यत्तदग्रे विषमिव परिणामे

मृतोपमं ॥ तत्सुखं सात्विकं

प्रोक्तमात्मबुद्धिप्रसादजं ॥ ३

विषयेंद्रियसंयोगाद्यत्तदग्रे।
मृतोपमं ॥ परिणामे विषमि
व तत्सुखं राजसं स्मृतं ॥३८॥
यदग्रे चानुबंधे च सुखं मोह।

नमात्मनः ॥ निद्रालस्यप्रमा

दोत्थं तन्नाममसमुद्राहृते ॥ य

न्नरक्षितिपृथ्विमांबादिवि

देवेषुवाप्यनः ॥ सर्वेषुक्ति

जैर्मुक्तंयदेभिःस्यात्रिभिर्गुणैः ॥ ४० ॥ ब्राह्मणक्षत्रियविशां शूद्राणांचपंतप ॥ कर्माणिप्रविभक्तानि स्वभाव

प्रभवैर्गुणैः॥४१॥शमोदमस्त
पःशौचंक्षांतिरार्जवमेवच॥
ज्ञानंविज्ञानमास्तिक्यंब्रह्म।
कर्मस्वभावजं॥४२॥शौर्यंते।

श्री
९७

जेपतिदेसंबुरेचाणपलाय
वे ॥ दानसीखभावखलोओ।
कर्मखभावने ॥ ४३ ॥ कृषियो
रखवाणिजासेवेधपकर्मख।

भावजं ॥ परिचर्यात्मकंकर्म
शूद्रस्यापिस्वभावजं ॥ ४४ ॥
स्वेस्वेकर्मण्यभिरतःसंसिद्धिं
लभतेनरः ॥ स्वकर्मनिरतः ।

गी
२८१

सिद्धिंयथाविंदतितच्छृणु॥४
यतःप्रवृत्तिर्भूतानांयेनसर्व
मिदंततं॥ स्वकर्मणातमभ्य
र्च्यसिद्धिंविंदतिमानवः॥४६

श्रेयान्स्वधर्मो विगुणः परध
र्मात्स्वनुष्ठितात् ॥ स्वभावनि
यतं कर्म कुर्वन्नाप्नोति किल्बि
षं ॥ ४७ ॥ सहजं कर्म कौंतेय स

गी

३८२

दोषमपिनत्यजेत ॥ सर्वारं
भाहिदोषेणधूमेनाग्निरिवा
वृताः ॥ ४८ ॥ असक्तबुद्धिःस
र्वत्रजितात्माविगतस्पृहः ॥ नै

कर्मसिद्धिंपरमांसंन्यासे

नाधिगछति ॥ ४९ ॥ सिद्धिंप्रा

प्तोयथाब्रह्मतथाप्नोतिनि

बोधमे ॥ समासेनैवकौंते

यनिषज्ञानस्यपापगा ॥ ५८ ॥
ब्रह्माविष्णुइद्याश्चेतोयस्मा
न्मानेनियमस्यच ॥ शब्द्वारीवि
धयांस्तस्मापापाहैषायुदस्मा

च ॥ ५१ ॥ विविक्तसेवी लघ्वाशी
यतवाक्कायमानसः ॥ ध्यान
योगपरो नित्यं वैराग्यं समुपा
श्रितः ॥ ५२ ॥ अहंकारं बलं दर्पं

गी

२२४

कामं क्रोधं परिग्रहं ॥ विमुच्य
निर्ममः शांतो ब्रह्मभूयाय क
ल्पते ॥ ५३ ॥ ब्रह्मभूतः प्रसन्ना
त्मा न शोचति न कांक्षति ॥

समः सर्वेषु भूतेषु मद्भक्तिं।
लभते परां ॥ ५४ ॥ भक्त्या माम
भिजानाति यावान्यश्चास्मि।
तत्वतः ॥ ततो मां तत्वतो ज्ञा

गी
२८५

त्वा विशते तदनंतरं ॥ ५५ ॥ स
र्वकर्माण्यपि सदा कुर्वाणो
मद्व्यपाश्रयः ॥ मत्प्रसादाद
वाप्नोति शाश्वतं पदमव्ययं ॥ ५६

चेतसा सर्वकर्माणि मयि सं
न्यस्य मत्परः ॥ बुद्धियोगमुपा
श्रित्य मच्चित्तः सततं भव ॥५७॥
मच्चित्तः सर्वदुर्गाणि मत्प्रसा·

दात्तरिष्यसि ॥ अथ चेत्त्वमहंका
रान्न श्रोष्यसि विनंक्ष्यसि ॥ ५८
यदहंकारमाश्रित्य न योत्स्य
इति मन्यसे ॥ मिथ्यैष व्यवसा

यत्ते प्रकृतिस्त्वां नियोक्ष्यति ॥
स्वभावजेन कौंतेय निबद्धः।
स्वेन कर्मणा ॥ कर्तुं नेच्छसि।
यन्मोहात्करिष्यस्यवशोपि-

तत् ॥६०॥ ईश्वरः सर्वभूतानां
हृद्देशेर्जुनतिष्ठति ॥ भ्रामयं
सर्वभूतानि यंत्रारूढानि मा
यया ॥६१॥ तमेव शरणं गच्छ

सर्वभावेनभारत॥तत्प्रसादा
त्परांशांतिंस्थानंप्राप्स्यसि
शाश्वतं॥६२॥इतितेज्ञानमा
ख्यातंगुह्याद्गुह्यतरंमया॥वि

गी
१८८

मृश्यैतदशेषेण यथेच्छसि तथा
कुरु ॥६३॥ सर्वगुह्यतमं भू
यः शृणु मे परमं वचः ॥ इष्टो
ऽसि मे दृढमिति ततो वक्ष्यामि

तेहितं ॥६४॥ मन्मनाभवमद्भ

क्तोमद्याजीमांनमस्कुरु ॥ मा

मेवैष्यसिसत्यंतेप्रतिजानेप्रि-

योसिमे ॥६५॥ सर्वधर्मान्प-

गी
२६४

त्यज्यमामेकंशरणंव्रज ॥ अ
हंत्वांसर्वपापेभ्योमोक्षयि-
ष्यामिमाशुचः ॥ ६६ ॥ इदंतेना-
तपस्कायनाभक्तायकदा ।

चन॥ नचाशुश्रूषवेवाच्यंनच
मांयोभ्यसूयति॥६७॥यइमं
परमंगुह्यंमद्भक्तेष्वभिधास्य
ति॥भक्तिंमयिपरांकृत्वामा

मेवैष्यत्यसंशयः ॥६८॥ न च ता-
स्मान्मनुष्येषु कश्चिन्मे प्रि-
यकृत्तमः॥ भविता न च मे त-
स्मादन्यः प्रियतरो भुवि ॥६९॥

ध्येष्यते च य इमं धर्म्यं संवा-

दमावयोः॥ ज्ञानयज्ञेन तेना-

हमिष्टः स्यामिति मे मतिः॥ ७-

श्रद्धावाननसूयश्च शृणुयाद्या।

गी
१५।

दपियोनरः ॥ सोपिमुक्तः शुभा

ल्लोकान्प्राप्नुयात्पुण्यकर्म

णां ॥ ७१ ॥ कच्चिदेतच्छ्रुतंपार्थ

त्वयैकाग्रेणचेतसा ॥ कच्चि

दज्ञानसंमोहः प्रणष्टस्तेधनं
जय ॥७२॥ अर्जुनउवाच ॥ नष्टो
मोहःस्मृतिर्लब्धात्वत्प्रसादान्म
याच्युत ॥ स्थितोस्मिगतसंदेहः

गी

१९१

दःकरिष्येवचनंतव॥७३॥संज
यउवाच॥इत्यहंवासुदेवस्यपा
र्थस्यचमहात्मनः॥संवादमि
ममश्रौषमद्भुतंरोमहर्षणं॥७

य

व्यासप्रसादाच्छ्रुतवानेतद्गुह्य
महंपरं॥ योगंयोगेश्वरात्कृष्णा
त्साक्षात्कथयतःस्वयं॥७५॥रा
जन्संस्मृत्यसंस्मृत्यसंवादमिम

गी
३४५

ममद्भुतं ॥ केशवार्जुनयोः पु।
ण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥
तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भु।
तं हरेः ॥ विस्मयो मे महान्राजन् ह

ष्यामि च पुनः पुनः ॥७७॥ यत्र यो
गेश्वरः कृष्णो यत्र पार्थो धनुर्द्ध
रः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा
नीतिर्मतिर्मम ॥७८॥ इति श्रीमहा

भारतेशतसहस्रसंहितायांभी
ष्मपर्वणिश्रीभगवद्गीतासूपनिष
त्सुब्रह्मविद्यायांयोगशास्त्रेश्री
कृष्णार्जुनसंवादेष्टादशोध्यायसमाप्तः

मेपुर्णकामनासीधार्थे श्रीभगवत्

गिता पाठ वंगोवींददास मंत्रस्ना:

वीप्रताप श्रीमन माहाराजाधी

राजश्रीरणबीसींघप्रतापीजंबु:

कासमीराश्रनेकव:लायतांधि

कारीके प्रतापसैं मी ल्यो पुसतक

संमत १८३७ कातीकसुकल

पुन्यां सुभमसतु सलोक ग्रंथ ॥

ल्याकपारं प्रह लिकुटलेमाद

कः किंव संतो नो चक्रिवीकुलाली

